तोःपुरःकुलिकंस्थापयेत्॥ततःपूर्वेअश्विन्यादिसप्तनक्षत्राणिविष्कुंभादिसप्तयोगान्बवबालवेकरणेसप्तद्वी
पानि॥ऋग्वेदंचदक्षिणे॥पुष्यादिसप्तनक्षत्राणि॥धृत्यादिसप्तयोगान्॥कौलवतैतलेकरणे॥सप्तसागरान्॥य
जुर्वेदंपश्चिमे॥स्वात्यादिसप्तनक्षत्राणिवज्रादिसप्तयोगान्॥गरवणिजेकरणे॥सप्तपातालानि॥सामवेदं॥उत्त
रेभिजिदादिसप्तनक्षत्राणि॥साध्यादिषड्योगात्॥विष्टिकरणं॥भूराद्यान्सप्तलोकान्॥अथर्ववेदंच॥वाय
व्येध्रुवं॥सप्तर्षिततोयथा॥वकाशं॥गंगादिसप्तसरितःसप्तकुलचलान्अष्टौवसून्॥द्वादशादित्यान्॥ए
कादशरुद्रान्॥एकोनपंचाशन्मरुतःषोडशमातृःष— तून्॥द्वादशमासान्॥द्वेअयते॥पंचदशतिथीः॥षष्टि
संवत्सरान्॥सुपर्णान्नागान्॥सर्पान्॥यक्षान्॥गंधर्वान्॥विद्याधरान्॥अप्सरसः॥रक्षांसिभूतानि॥मनु
ष्यान्॥इति॥कोटिहोमेतुवेदेपूर्वेब्रह्मा॥मध्येजनार्दनःपश्चिमेरुद्रः॥उत्तरेस्कंदः॥तदस्तुगृहावैइत्यावाह
॥पुरुषसूक्तेनषोडशोपचारैः॥संपूज्यप्रार्थयेत्॥आदित्यावसावारुद्रामरुतोलोकपास्तथा॥ब्रह्माजना

र्दनश्चवशूलपाणिर्भगोक्षह॥अत्रसन्निहिताःसर्वेभवंतुमखभागिनः॥पूजांगृह्णंतुसर्वेत्रमयाभक्त्योप
पादितः॥कुर्वंतुचशुभंसर्वेयज्ञकर्तुःसमीहिता॥इति॥ततोवेदीशान्यांकुंभंसंस्थाप्य॥वरुणंसंपूज्यदेवदा
नवसंवादेइतिसंप्रार्थ्यांत्वाधानंकुर्यात्॥चक्षुषीआज्येनेत्यंतमुक्त्वानवग्रहानष्टशताष्टाविंशत्यष्टान्यतमसं
ख्याभिःसमिच्चर्वाज्याहुतिभिरधिदेवताद्याःप्रधानदशांशेनद्वित्राभिर्वासमिच्चर्वाज्याहुतिभिः॥नवग्रहानयु
तलक्षकोट्यन्यतरसंख्याभिर्यवव्रीहिघृततिलान्यतराहुतिभिःशेषेनस्विष्टकृतमित्याह॥चर्वाज्याहुतिरेकै
वसर्वेषामितिपक्षेतथोल्लेखे॥लक्षकोटिहोमयोर्गरुत्मं॥तमष्टशतादिसंख्ययासमिदादिभिःकोटिहोमेब्रह्मा
दीनांगरुवत्॥पर्वेकाहुपक्षेनवस्थाल्यावदानधर्मश्चलक्षहोमादेर्बहुदिनेसाध्यत्वेचरुस्विष्टकृदाद्यदिन
एवकार्यः॥यावद्धोमंप्रतिदिनंग्रहपूजाकार्या॥कोटिहोमेप्रतिसहस्रंपूर्णाहुतिरपि॥होमसमाप्तौअग्निंसंपूज्य
स्विष्टकृत्कृदादिप्रायश्चित्तहोमांतंकृत्वाग्नेःसमंतादिक्पालेभ्योवेदेःसमंतान्नवग्रहेभ्योवेदेरुत्तरतोविनायका
दिसप्तभ्योगरुत्मतेचतत्तन्मंत्रैर्माषभक्तबलीन्दत्वाक्षेत्रपालबलिंदुर्ब्राह्मणेनशूद्रेणवाचतुष्पदेक्षेपयेत्॥

ततः प्रक्षालितपादो द्वादशगृहीतेन चतुर्गृहीतेन वासवस्त्रनालिकेरयुतेन पूर्णाहुतिं जुहुयात्॥ तत्र मंत्राः
समुद्रार्मिरिति तृचस्य गौतमो वामदेवोग्निस्त्रिष्टुप् मूर्धानं दिवो वार्हपस्पत्यो भरद्वाजो वैश्वानरस्त्रिष्टुप्॥
पुनस्त्वाग्निर्वसुरुद्रादित्यास्त्रिष्टुप्॥ पूर्णादर्वि विश्वेदेवाः शतक्रतुरनुष्टुप्॥ सप्त ते अग्ने सप्त वानग्निर्ज
गती॥ धामं ते वामदेव आपो जगती॥ इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्त ते अग्नये ऽश्व
नममेति त्यागः॥ अथ वसोर्द्धारां पातयेत्॥ तत्र मंत्रा॥ अग्निमीळे इति नवानां मधुच्छंदा अग्निर्गायत्री वि
ष्णोर्नुकमिति षण्णां दीर्घतमा विष्णुस्त्रिष्टुप्॥ आ ते पितरिति पंचदशानां गृत्समदो रुद्रस्त्रिष्टुप्॥ स्वादिष्ट्ये
ति दशानां मधुच्छंदाः पवमानसोमो गायत्री॥ महावैश्वानरज्येष्ठसामनी च॥ पूर्णपात्रविमोकादिकर्मशेषं
समाप्य सर्त्विक्श्रेयःसंपादनं कृत्वा कुंडेशानभागे स्वस्तिकोपरि भद्रासनस्थितं यमानं ग्रहकलशोदकेन
समुद्रज्येष्ठा इत्यादिभिः सुरास्त्वेत्यादिभिश्चाभिषिंचेत्॥ अत्र पत्नी वामे॥ ततो यजमानः सर्वौषधीभिरनुलिप्य
स्नात्वा धेनादिदक्षिणां पूर्वोक्तमंत्रैर्दद्यात्॥ अयुतहोमे एकैकं लक्षहोमे दशकोटिहोमे शतं॥ शतं न्यूनमूल्यं च

सुवर्णेन समं कर्त्तव्यं। मुख्याभावे सुवर्णं दद्यात्॥ ततो द्वारजापकेभ्योन्येभ्यश्च यथाशक्ति दक्षिणां दत्वा पूर्वस्थापि
तदेवताः संपूज्याचार्यापि दत्वाग्निं संपूज्य विभूतिं धृत्वा॥ गच्छ गच्छेत्यग्निं विसृज्य ब्राह्मणान्भोज्य कर्म समाप्ति
वाचयित्वा कर्म परमेश्वरार्पणं कृत्वा नृत्याद्युत्सवं कारयेत्॥ इति दिनकरभट्टलक्षणे शांतिसारे लक्षहोमा
दिपद्धतिः॥ ॥ अथ कोटिहोमे शतमुखादिभेदाः॥ हेमाद्रौ॥ भविष्योत्तरे॥ शताननो दशमुखो द्विमुखस्तथा॥
चतुर्विधो महाराज कोटिहोमो विधीयते॥ कृत्वा कुंडं शतं दिव्यं यथोक्तहस्तसम्मितं॥ एकैकस्मिंस्ततः कुंडे दशवि
प्रान्नियोजयेत्॥ एकस्यां न प्रणीतेग्नौ सर्वतः परिभाविते॥ होमं कुर्युर्द्विजाः सर्वे कुंडे यथोदितं॥ अत्र सर्वेतिकर्त्त
व्यता पूर्ववत्॥ कुंडानां हस्तमात्रता घृतादिशीघ्रदाहिद्रव्यविषयातिलयवादौ तु॥ अयुते त्वथ होतव्ये कुंडं
स्याद्धस्तमात्रकं॥ द्विगुणं लक्षहोमे च कोटिहोमे चतुर्गुणमिति॥ वाक्यात् लक्षार्धोत्रिकरं कुंडं लक्षहोमे च
तुष्करमिति॥ अविरोधात्॥ तथैव वाचार्यो निर्ऋत्य कुंडेग्निं प्रतिष्ठापयेत्॥ ततस्तमग्निमन्येषु कुंडेषु ऋ
त्विजः प्रणयेयुः युक्त्या च द्विकरं वा वोद्धव्यं। अर्थात्परिमाणमिति कात्यायनोक्तेः॥ अत्र सहस्रब्राह्मणसं

ख्या ऋत्विग्विषयाः॥ इति शतमुखः॥ यदा दशमुखः कार्यः कोटिहोमो महामते॥ विप्राणां द्विशती तत्र सुविभज्य
नियोजयेत्॥ अत्र चैकस्मिन् कुंडे दशलक्षहोम ऋत्विजां विंशतिश्च॥ कुंडं पंचकरं प्रोक्तं दशलक्षहुताक्षाहुतौ क्र
मात्॥ इति तंत्रांतरोक्तं॥ शेषं पूर्ववत्॥ इति दशमुखः॥ अथ कुंडद्वयं कृत्वा विभज्य च विभावसु॥ होमं कु
र्याद्द्विजो भूयः संस्कृत्य विधिपूर्वकं॥ शतं तत्र नियोज्यं स्याद्विप्राणां विप्रभज्य वै॥ यद्वा मासेर्धमासे वा कार्य
काल उपस्थिते॥ तदानु द्विमुखः कार्यः कोटिहोमो विचक्षणैः॥ अत्र पंचाशदृत्विजः प्रतिकुंडं॥ अन्यत्प्राग्व
त्॥ इति द्विमुखः॥ अत्र मंडपे विशेषो भविष्योत्तरे॥ उत्तमं शतहस्तं तु तदर्धेन तु मध्यमं॥ जघन्यं तु तदर्धेन श
क्तिकालाद्यपेक्षया॥ शतमुखो मुखशतहस्तः दशमुखे पंचाशद्धस्तः द्विमुखे पंचविंशतिहस्तः॥ शतहस्तमंडपे दश
हस्तान्॥ ततः कोष्ठकान् कृत्वा तन्मध्ये शतं द्विहस्तानि कुंडानि कुर्यात्॥ एवं दशमुखपोरपीति॥ अथादित्यशां
तिः॥ मदनरत्ने भविष्योत्तरे॥ आदित्यवारे हस्तेन गृह्य विचक्षणः॥ मंत्रोक्तविधिना सर्वं कुर्यात्पूजादिकं रवेः॥ प्रत्ये
कं सप्तनक्तानि कृत्वा भक्तिपरोत्परः॥ ततस्तु सप्तमे प्राप्ते कुर्याद्ब्राह्मणभोजनं॥ भास्करं शुद्धसौवर्णं कृत्वा यत्ने

नमानवः॥ ताम्रपात्रे स्नापयित्वा रक्तपुष्पैः प्रपूजयेत्॥ रक्तवस्त्रयुगच्छत्रं छत्रोपानद्युगान्वितं॥ घृतेन स्नाप
यित्वा च लड्डुकान् विनिवेद्य च होमं घृततिलैः कुर्याद्रविनाम्ना च मंत्रवित्॥ समिधोष्टोत्तरशतमष्टाविंशतिरेव च॥
होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च॥ समिधोर्कसमिधः मंत्रेणानेन विदुषे ब्राह्मणाय प्रदीपयेत्॥ रविदेव नम
स्तुभ्यं सप्तसप्ते दिवाकर॥ त्वं रवो तारयास्वास्मन्नस्मात्संसारसागरात्॥ सूर्यपीडासु घोरासु कृता शांतिः शुभप्रदा
॥ इत्यादित्यशांतिः॥ अथ चंद्रशांतिः॥ तत्रैवं॥ तद्वच्चित्रासु संगृह्य सोमवारं विचक्षणः॥ अनेनैवोक्तविधिना कुर्यात्पू
जादिकं विधोः॥ सप्तमे तु ततः प्राप्ते कुर्याद्ब्राह्मणभोजनं॥ सप्तमे नक्ते॥ कांस्यपात्रे थ स्थाप्य सोमं रजतसंभवं॥ श्वे
तवस्त्रयुगच्छत्रं श्वेतपुष्पैः प्रपूजितं॥ पादुकोपानहौ छत्रं भोजनासनसंयुतं॥ होमं घृततिलैः कुर्यात्सोमनाम्ना च मं
त्रवित्॥ सोमेधोष्टोत्तरशतमष्टाविंशतिरेव च॥ होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च समिधः पलाश्यः॥ द
ध्यन्नं शिखरे कृत्वा ब्राह्मणाय निवेदयेत्॥ कृत्वा सोमं घृत्वेत्यर्थः॥ मंत्रेणानेन राजेंद्र सम्यग्भक्त्या समन्वितः॥ सह
देवी जातिवल्ली पुष्पगोक्षीरपांडुर॥ सोमसौम्यो भवास्माकं सर्वदा ते नमो नमः॥ एवं कृते महासौम्य सोमस्तुष्टि

करोभवेत्॥ इतिचंद्रशांतिः॥ अथांगारकः शांतिः॥ तत्रैव॥ स्वात्यामंगारकं गृह्य क्षमायां नक्तभोजनं॥ क्षमा भूमिः॥
ससमेत्वथ संप्राप्ते हैमं ताम्रे निवेश्य वै॥ रक्तवस्त्रयुगछत्रं कुंकुमेनानुलेपितं॥ निवेद्य भक्तकंसारं पुष्पधूपाक्ष
तादिभिः॥ होमं घृततिलैः कुर्यात् कुजनाम्ना च मंत्रवित्॥ समिधोष्टोत्तरशतमष्टाविंशतिरेव च॥ होतव्या मधु
सर्पिर्भ्यां दध्नौ चैव घृतेन च॥ समिधः खादिर्यः॥ मंत्रेणानेन तं दद्याद्ब्राह्मणाय कुटुंबिने॥ कुंजकुप्रभवोपि त्वं मं
गलः परिगद्यसे॥ अमंगलं निहत्याशु सर्वदा यच्छ मंगलं॥ एवं कृते भौमकृतं दुष्कृतं शांतिमाप्नुयात्॥ इत्यंगारक
शांतिः॥ अथ बुधशांतिः॥ तत्रैव॥ विशाखासु बुधं गृह्य ससनक्तान्यथाचरेत्॥ बुधं हेममयं कृत्वा स्थापितं कां
स्यभाजने॥ शुक्लवस्त्रयुगछत्रं शुक्लमाल्यानुलेपनं॥ सोमपुत्र नमो नमः॥ होमं घृततिलैः कुर्याद्बुधनाम्ना च मंत्रवि
त्॥ समिधोष्टोत्तरशतमष्टाविंशतिरेव च॥ होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च॥ समिधोपामार्गस्य॥ इ
ति बुधशांतिः॥ अथ गुरोः शांतिस्तत्रैव॥ गुरुं चैवानुराधासु पूजयेद्भक्तितो नरः॥ पूर्वोक्तविधियोगेन ससन
क्तान्यथाचरेत्॥ हैमं हैमये पात्रे स्थापयित्वा बृहस्पतिं॥ पीतांबरयुगछत्रं पीतयज्ञोपवीतिनं॥ पादुकोप

नहछत्रकमंडलुविभूषितं॥ पूजयेत्पीतकुसुमैः कुंकुमेन विलेपितं॥ धूपदीपादिभिर्दिव्यैः फलैश्चंद
नदंडुलैः॥ खंडखाद्योपहारैश्च गुरोरग्रे निवेदयेत्॥ धर्मशास्त्रार्थतत्वज्ञज्ञानविज्ञानपारगः॥ वि
बुधार्त्तिहरा चिंत्य देवाचार्य नमोस्तु ते॥ होमं घृततिलैः कुर्यात् गुरुनाम्ना च मंत्रवित्॥ समिधो
ष्टोत्तरशतमष्टाविंशतिरेव च॥ होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च॥ समिधोश्वत्थस्य॥ विष
मस्थो गुरौ कार्या महाशांतिरियं नृभिः॥ इति गुरुशांतिः॥ अथ शुक्रशांतिः॥ शुक्रं ज्येष्ठासु संगृह्य क्षमायां नक्त
भोजनं॥ गुरुकुंकुममार्गेण द्विजसंतर्पणेन च॥ ससमेत्वथ संप्राप्ते रौप्यं शुक्रं तु कारयेत्॥ वंशपात्रे च संस्था
प्य पूजयेत्सितपंकजैः॥ तदभावे सितैः पुष्पैस्तांबूलैश्चंदनेन च॥ अग्रे तस्य प्रदातव्यं पायसं घृतसंप्लुतं॥ दद्याद
नेन मंत्रेण ब्राह्मणाय कुटुंबिने॥ भार्गवो भृगुशुक्रश्च श्रुतिः स्मृतिविशारदः॥ हित्वा ग्रहकृतान् दोषान् आयु
रारोग्यदस्तु सः॥ होमं घृततिलैः कुर्याच्छुक्रनाम्ना च मंत्रवित्॥ समिधोष्टोत्तरशतमष्टाविंशतिरेव च॥ होत
व्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च इति शुक्रशांतिः॥ अथ शनिश्चरादिशांतिः॥ तत्रैव॥ शनैश्चरं राहुकेतूल्लोहपा

त्रेषु विन्यसेत्॥ कृष्णागरुः स्मृतो धूपो दक्षिणा च स्वशक्तितः॥ यथाक्रमं शमी दूर्वा कुशानां समिधः स्मृताः॥ सस
मेत्वथ संप्राप्त तद्वर्णानथ कारयेत्॥ कृष्णवस्त्रयुगच्छत्रमेकैकं कारयेद्बुधः॥ भृगनागाभ्यासमालभ्य कृशरान्वि
निवेद्य च॥ होमावसाने तत्सर्वं ब्राह्मणाय च दापयेत्॥ शनैश्चर नमस्तेस्तु नमस्ते राहवे तथा॥ केतवे
च नमस्तुभ्यं सर्वे शांतिं प्रयच्छति॥ शनैश्चरादिशांतिः॥ ॥ अथ शनैश्चरव्रतं तत्रैव॥ ततो मंदस्य दिवसे स्नानम
भ्यंगपूर्वकं। कार्यं देयं च विप्राय तैलभ्यंगहेतवे॥ यस्तु संवत्सरं यावत्प्रासेशनिदिने रतः॥ तैलं ददाति विप्राणां
स्वशक्त्या त्यजतेपि च॥ कृष्णगोदक्षिणायुक्तं कृष्णं बलशायिनं॥ स्वयमभ्यंगतः स्नात्वा कृष्णपुष्पैस्तमर्चयेत्॥
सुगंधिगंधपुष्पैश्च कृशरान्नैः॥ पूजयित्वा सूर्यपुत्रं क्षमस्वेति पुनः पुनः॥ कृष्णाय द्विजमुख्याय तदभावे तराय
च॥ देयः शनैश्चरो भक्त्या मंत्रेणानेन वै द्विजः॥ कोणं नीलांजनप्रख्यं मंदवेष्यप्रसारिणं॥ छायामार्त्तंडसंभूतं
नमस्यामि शनैश्चरं॥ नमोर्कपत्राय शनैश्चराय॥ नीहारवर्णांजनमेवकाय॥ श्रुत्वा रहस्यं भवकामदस्त्वं कल
प्रदो मे भव सूर्यपुत्र॥ नमोस्तु प्रेतराजाय कृष्णदेहाय वै नमः॥ शनैश्चराय क्रूराय शुद्धबुद्धिप्रदायिने॥ अथ

शनैश्चरशांतिः॥ तत्रैव स्कांदे॥ द्वादशाष्टमजन्मस्थे शनौ सर्वग्रहेश्वरे॥ श्रावणे मासि संजाते प्रथमे शनिवा
सरे॥ होलोहरूपं शनिं कृत्वा स्नाप्य पंचामृतैर्नवैः॥ पुष्पैरष्टविधैर्धूपैः फलैश्चैव विशेषतः॥ नामभिः पूजये
देवैः क्रमेण ग्रहसत्तमं॥ कोणस्तु पिंगलो बभ्रुः कृष्णो रौद्रयमोंतकः॥ सौरिः शनिनैश्चरो मंदः पिप्पलादेन मा
स्तुतः॥ शन्नो देवीति सर्वत्र वैदिकेन च पूजयेत्॥ पूजयित्वा च नैवेद्यं ततः कुर्यात्क्रमेण तु॥ समाषभक्तं प्रथमे
द्वितीये पापसंशुभं॥ तृतीये त्वबिलीकार्या चतुर्थे पूरिका शुभा॥ अंबिली तक्रतंडुलपिष्टादिनिर्मितो लेह्यवि
शेषः॥ प्रथमादिशब्दा वासपराः॥ इति शनैश्चरशांतिः॥ अथ शनैश्चरस्तुतिः॥ मदनरत्ने॥ नारद उवाच
॥ ततः कृतांजलिर्भूत्वा स्तुतिं चक्रे सबालकः॥ पिप्पलादो द्विजः श्रेष्ठः प्रणिपत्य मुहुर्मुहुः॥ नमस्ते कोणसं
स्थाय पिंगलाय नमोस्तु ते॥ नमस्ते बभ्रुरूपाय कृष्णाय च नमोस्तु ते॥ नमस्ते रौद्रदेहाय नमस्ते चांतकाय च॥
नमस्ते यमसंज्ञाय नमस्ते सौरये विभो॥ नमस्ते मंदसंज्ञाय शनैश्चर नमोस्तु ते॥ प्रसादं कुरु देवेश दीनस्य प्रण
तस्य च॥ शनैश्चर उवाच॥ परितुष्टोस्मि ते वत्स स्तोत्रेणानेन सांप्रतं॥ वरं वरय भो वत्स येन यच्छामि वांछितं॥ पिप्प

लादउवाच॥अद्यप्रभृतीनोपीडाबालानांरविनंदन॥त्वयाकार्यामहाभागस्वकीयानकथंचन॥यावद्वर्षाष्टकंजा
तंममवाक्येनसूर्यज॥स्तोत्रेणानेनयोन्यस्त्वांब्रूयात्स्नातरुपस्थितः॥तस्यपीडानकर्त्तव्यात्वयाभास्करनंदन॥अ
र्धाष्टमकपायोगेतावाकेसंस्थितेनरः॥सार्द्धसप्तवर्षपर्यंतद्वादशजन्मद्वितीयराशिभिर्यःशनैश्चरयोगः
सार्धाष्टमिक॥तववारेतुसंप्राप्तेयस्तिलांलोहसंयुतान्॥शक्त्याददातिनोतस्यपीडाकार्यात्वयाविभो॥कृष्णां
गांयस्तुविप्रायतवोद्देशेनयच्छति॥अर्धाष्टमिकयापीडातस्यकार्यात्वयानच॥शमीसमिद्भिर्योहोमंत
वोद्देशेनवर्त्तयेत्तथाकृष्णतिलैश्चैवकृष्णपुष्पानुलेपनैः॥पूजांकरोतियस्तुभ्यंधूपंवैगुग्गुलंदहेत्॥
कृष्णवस्त्रेणसंवेष्ट्यन्याज्यातस्यत्वयाव्यथा॥सूतउवाच॥एवमुक्तःशनिस्तेनववाढमित्येवजज्यच॥
नारदंसमनुप्राप्यजगामनिजसंश्रयं॥इतिशनैश्चरशांतिः॥अथनवग्रहस्नानानि॥तत्रैव॥विष्णुर्ध
र्मे॥मांजिष्ठामदमातंगंकुंकुमंरक्तचंदनं॥पूर्णकुंभकृतंताम्रसूर्यस्नानंविधीयते॥मदमातंगंगज
मदः॥उशीरंचशिरीषंचकुंकुमंरक्तचंदनं॥शंखन्यस्तमिदंस्नानंचंद्रदोषविनाशनं॥खदिरंदेवदारुंच

तिलान्यामलकानिच॥पूर्णकुंभेकृतेरौप्यैभौमपीडाविनाशनं॥नदीसंगमतोयानितन्मृदासहितानिच
॥न्यस्तानिकुंभेमाहेयेबुधपीडाविनाशनं॥माहेयेमन्मये॥ऊंदुंबरंतथाबिल्वंवटमामलकंतथा॥न्यस्तं
तुकुंभेसौवर्णेजीवपीडाविनाशनं॥तिलान्माषान्प्रियंगुंचगंधपुष्पंतथैवच॥न्यस्तंकार्ष्णायसेकुंभे
सारिपीडाविनाशनं॥गुग्गुलंहिंगुलंतालंशुभांचैवमनःशिलं॥शृंगेचमाहिषेन्यस्येद्राहुपीडाविनाशनं॥
तालंचहरितालंचराहविविहताराजन्पर्वताग्रमृदंतथा॥छागक्षीरंखड्गपात्रेकेतुपीडाविनाशनं॥ग्रह
स्नानमिदंप्रोक्तंसर्वपीडाविनाशनं॥इतिग्रहयोगाख्यशांतिकं॥एकर्क्षेतिग्मराशौचएकराश्यृक्षभेद
नेशशिसूर्यसमायुक्तेग्रहत्रयसमन्विते॥दुर्भिक्षादिभयेचैवचतुर्ग्रहसमन्विते॥महारोगभयंराष्ट्र
क्षयोवृष्टिविनाशनं॥यंवग्रहसमायोगेदुर्भिक्षंसंकरादिकं॥नृपवैरंगर्भनाशोजायतेजननाशनं॥
ग्रहषट्कसमायोगेमंत्रिणोमरणंभवेत्॥पश्वश्वादिभयंसर्वेसंकरादिजनक्षयः॥यदराज्ञोविनाशोवामहा
भयमथापिवा॥सप्तग्रहसमायोगेक्षिताशमरणंभवेत्॥जगत्प्रलयमेवापितदानिर्मानुषंजगत्॥सूर्यःस्या

व्यतिरिक्तश्चेन्नदायोगामहाद्भुतः॥विनाचंद्रेणयोगैर्मपजगत्प्रलयकारणं॥तदाक्षजातजंतूनांमहारोगोम
हाभयं॥अर्थनाशस्थाननाशोमानहानिर्नपीडनं॥षण्मासाभ्यंतरेवापिआयुर्हानिःश्रियस्तथा॥जन्माष्ट
द्वादशेराशौचतुर्थेपंचमेपिवा॥पूर्वोक्तिफलमेवातस्तस्माच्छांतिंप्रयत्नतः॥कुर्याद्दोषानुसारेणवित्तशाठ्यं
नकारयेत्॥तत्तद्ग्रहकृतिंकृत्वासोवर्णोनप्रयत्नतः॥सुवर्णस्यतदर्धेनपादेनापिकनीयसी॥ग्रहस्यैककल
शंग्रहयोगप्रमाणतः॥कारयेत्कुंभमेकंवानिर्व्रणंसुदृढंनवं॥ग्रहस्यैशानदिग्भागेशुद्धदेशेसमस्थले॥कुं
डेवास्थंडिलेवापिहोमंकुर्याद्विधानतः॥तस्यपूर्वेत्तरेदेत्तरेदेशेपूजास्थानंप्रकल्पयेत्॥चतुर्हस्तहस्तमा
त्रंस्थंडिलंतंडुलेननु॥लिखेद्ग्रहाकृतिंतत्रस्थापयेत्प्रतिमांततः॥अधिप्रत्यधिदेवादान्दक्षिणोत्तरतःक्षि
पेत्॥उक्तेगंधैस्तथाप्याद्यैःफलैर्धूपैस्तत्तन्माल्यैःफलैरपि॥तत्तद्ग्रहोक्तमंत्रेणपूर्वोक्तेनैवपूजयेत्॥ग्रहपू
जादिकंकृत्वानैवेद्यांतंसमर्पयेत्॥ततोहोमंप्रकुर्वीतस्वगृह्योक्तविधानतः॥चतुर्थ्यंतंप्रकुर्वीतकलशस्थाप
नंततः॥पूर्वोक्तेनविधानेनशुद्धतोयेनपूरयेत्॥पंचामृतंपंचगव्यंपंचत्वक्पंचपल्लवं॥तत्रमंत्रैर्विनिक्षिप्य

ऊषधानिविनिक्षिपेत्॥तत्तद्ग्रहोक्तविधिनामूलान्यादायनिक्षिपेत्॥अर्हिंगैर्वारुणैर्वापिकलशंपूरयेद्गुरु
॥तत्तद्ग्रहोक्तविधिनातन्मंत्रैर्हुनेदथ॥चर्वाज्यंजुहुयात्पश्चात्तिलाहुतिमथाचरेत्॥ततःस्विष्टकृतंहुत्वा
होक्तमंत्रैश्शेषंसमापयेत्॥भद्रासनोपविष्टस्ययजमानस्यऋत्विजैः॥कलशस्थोदकेनैवमभिषेकंस
माचरेत्॥योगग्रहोक्तमंत्रैश्चअधिप्रत्यधिमंत्रतः॥नवग्रहोक्तमंत्रैश्चजातवेदादिपंचकैः॥त्रियंबके
नमंत्रेणक्षेत्रस्यपतिनाअपि॥यतइंद्रद्वयेनैवलोकपालाष्टकैरपि॥सुरास्त्वाइतिमंत्रेणयेनदेवादय
ःक्रमात्॥अन्यैश्चपुण्यसूक्तैश्चअभिषेकंसमाचरेत्॥अभिषेकाप्लुतंवस्त्रमाचार्यायप्रदापयेत्॥ततःशु
क्लांबरधरःकुर्यादाज्यावलोकनं॥ऋत्विग्भ्योदक्षिणांदद्याद्धेनुशंखादिकानपि॥तदभावेयथाशक्तिर्हिर
ण्यमपिदापयेत्॥ब्राह्मणान्भोजयेत्पश्चाद्यथाविभवसारतः॥इतिदिनकरभट्टकृतेशांतिसारेग्रहयोग
शांति॥ ॥अथगुरुपूजा॥मदनरत्नेस्कांदे॥कन्याविवाहकालेतुशुद्धिर्यस्यनविद्यते॥ब्राह्मणस्योपन
येनेयस्यस्यदुस्थितागता॥दुस्थितंप्रातः॥एभिःपूजागुरोःकार्याविधिवद्भक्तिभावितैर्मदंतिकामपुष्पा

णिपात्रपालाशवर्षया॥ मर्दतियूथिकाकामोदमनवृक्षः॥ गडूचीवाप्यपामार्गविडंगंशंखिनीवच॥ सहदे
वीविष्णुक्रांतासर्वौषध्यःशतावरी॥ कुष्टंमांसीहरिद्रेद्वेमुराशैलेयचंदनं॥ वचाकवोरमुस्तंवसर्वौषध्य
ःप्रकीर्त्तिताः॥ तथैवाश्वत्थभंगौचपंचगव्यंजलंतथा॥ नूतनंसोदकुंभंचपीतवस्त्रसमन्वितं। पंचरत्नैःस
मायुक्तंईशान्यांस्थाप्यचानलात्॥ याऽउषधीतिमंत्रेणभर्वास्तस्मिन्नितिक्षिपेत्॥ कुंभस्योपरितवस्था
पयित्वाबृहस्पति॥ सुवर्णपात्रेसौवर्णंप्रतिमांतुयुधिष्ठिर। कारयेत्तुयथाशक्त्याविन्नशाठ्यविवर्जित
॥ पीतवस्त्रयुगछत्रं। पीतयेज्ञोपवीतिनं॥ पूजयेद्गंधपुष्पाद्यैस्ततोहोमंसमाचरेत्समिधोश्वत्थवृक्षस्य
होम्याअष्टोत्तरंशतं॥ तिलव्रीहियवोन्मिश्रंहोतव्यंचयथाक्रमं॥ बृहस्पतेतिमंत्रेणऋषिछंदःसमन्वितं॥
ततोहोमावसानेचपूजयेच्चबृहस्पति॥ पीतगंधैस्तथापुष्पैर्धूपैर्दीपैश्चभक्तितः॥ दध्योदनंचनैवेद्यंफलं
तांबूलसंयुतं॥ नमअंगिरसांनाथावाक्पतेथबृहस्पते॥ क्रूरग्रहैःपीडितानाममृतायनमोस्तुते॥ ॥पू
जयित्वासुराचार्यंपश्चादर्घंनिवेदयेत्॥ गंभीरदृढरूपांगदेवेज्यसुमतेप्रभो॥ नमस्तेवाक्पतेशांतगृहा

णार्घंबृहस्पते॥ अर्घंदत्वासुरेशायजपहोमंसमर्चयेत्॥ भक्त्यायुक्तेसुराचार्यहोमपूजादिसत्कृतं॥ त
त्वंगृहाणशांत्यर्थंबृहस्पतेनमोनमः॥ मंत्रेणानेनसंकल्पपश्चात्संप्रार्थयेन्नृप॥ जीवोबृहस्पतिःसूरिरा
चार्योगुरुरंगिराः॥ वाचस्पतिर्देवमंत्रीशुभंकुर्यात्सदामम॥ सर्वोपचारसंयुक्तांप्रतिमांतांयुधिष्ठिरः॥
प्रणम्यचगवायुक्तामाचार्यायनिवेदयेत्॥ अथाचार्यस्तुनियतोवेदवेदांगपारगैः॥ यजमानंसपत्नीकं
शांतचित्तंजिंद्रियं॥ कुंभोदकंगृहीत्वातुमंत्रैरेतैःप्रसिंचयेत्॥ इदमापोथमंत्रेणतामग्निमृचातथा॥ याऽउ
षधीरश्वावतीःकूष्मांडेश्चानिषेचयेत्॥ पश्चात्संभोजयेद्विप्रात्यथाशक्त्यायुधिष्ठिर॥ संक्रांतावपि
कौंतेयतथास्वाभ्युदयेषुच॥ कुर्वन्बृहस्पतेःपूजामभीष्टंफलमाप्नुयात्॥ संक्रांतौगुरुसंक्रांतौइतिगुरु
पूजाविधिः॥ अथप्रतिशुक्रादिशांतिः॥ तत्रैवमात्स्ये॥ अथातःशृणुभूपालप्रतिशुक्रप्रशांतये॥ यात्रारंभे
वसानेचतथाशुक्रोदयेसति॥ शुक्रपूजाप्रकर्त्तव्यातानिशामयभारत॥ राजतेवाथसौवर्णेकांस्यपात्रे
थवापुनः॥ शुक्लंपुष्पांबरयुतेश्वेततांडुलपूरिते॥ तिधायराजनंशुक्रंशुचिमुक्ताफलान्वितं॥ महा

ક્ષેત્રજ્ઞયોર્જ્ઞાનચક્ષુષાન્તરમેવં ભૂતપ્રકૃતિમોક્ષં ચ યે વિદુર્યાન્તિ તે પરમ્ ॥૩૪॥

ઇતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે ક્ષેત્રક્ષેત્રજ્ઞવિભાગયોગો નામ ત્રયોદશોઽધ્યાયઃ ॥૧૩॥

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે ગુણત્રયવિભાગયોગો નામ ચતુર્દશોઽધ્યાયઃ ॥૧૪॥

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે પુરુષોત્તમયોગો નામ પઞ્ચદશોઽધ્યાયઃ ॥૧૫॥

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે દૈવાસુરસમ્પદ્વિભાગયોગો નામ ષોડશોઽધ્યાયઃ ॥૧૬॥

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે શ્રદ્ધાત્રયવિભાગયોગો નામ સપ્તદશોઽધ્યાયઃ ॥૧૭॥

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે મોક્ષસંન્યાસયોગો નામ અષ્ટાદશોઽધ્યાયઃ ॥૧૮॥

धरः॥ चंद्रोपरागकलुषं धनदोत्रव्यपोहतु॥ योसाविंदुधरो देवः पिनाकी वृषवाहनः॥ चंद्रोपरागपापानि
सनाशयतु शंकरः॥ त्रैलोक्येयानि भूतानि स्थावराणि चराणि च॥ ब्रह्मविष्ण्वर्करुद्राश्च दहंतु मम पा
तकं॥ एवमावाहयेद्देवान् मंत्रैरेभिश्च वारुणैः॥ एतानि च तथा मंत्रान्स्वर्णपदे विलेषयेत्॥ ताम्र
पदे थवा लिख्य न च वस्त्रे तथैव च॥ मस्तके यजमानस्य निदध्यात्तेद्विजोत्तमा॥ अभिषेकं ततः कुर्या
न्मंत्रैर्वारुणसूक्तकैः॥ आचार्यं वरयेत्पश्चात्स्वर्णपदं निवेदयेत्॥ आचार्यदक्षिणां दद्याद्दानं च स्वशक्ति
तः होमं वापि प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा॥ दानं च शक्तितो दद्यात्यदिच्छेदात्मनो हितं॥ सूर्यग्रहे सू
र्यनमयुक्तान्मंत्रांश्च कीर्तयेत्॥ अनेन विधिना यस्तु ग्रहेण स्नानमाचरेत्॥ न तस्य ग्रहणे दोषः कदाचि
दपि जायते॥ भार्गवार्चनदीपिकायां॥ ज्योतिःसागरे॥ सौवर्णं कारयेन्नागं पलेनाथ पलार्धतः॥ तदर्धेन
तदर्धेन फणायां मौक्तिकं न्यसेत्॥ ताम्रपात्रे निधायाथ घृतपूर्णे विशेषतः॥ कांस्ये वा कांनिलोहे चाम
स्य दद्यात्सदक्षिणं॥ चंद्रग्रहे तु रूप्यस्य च्चिचं दद्यात्सदक्षिणं॥ नागं रुक्ममयं सूर्यग्रहे विवचहेमजं॥ तुरं

गरंथगोभूमितिलसर्पिश्च कांचनं॥ कालविवेकेपि॥ सुवर्णनिर्मितं नागं सनिजं कांस्यभाजनं॥ सदक्षिणं स
वस्त्रं च ब्राह्मणाय निवेदयेत्॥ सौवर्णराजतं वापि विवं कृत्वा स्वशक्तितः॥ अपरागभवे क्लेशाच्छिदे विप्राय
कल्पयेत्॥ मंत्रस्तु॥ तमोमय महाभीम सोमसूर्यविमर्दनः॥ हेमताराप्रदानेन मम शांतिप्रदो भव॥ विधंतु
दनमस्तुभ्यं सिंहिकानंदनाच्युत॥ दानेनानेन नागस्य रक्षमां वेधजाद्भयात्॥ मदनरत्ने तु स्नानमात्रमुक्तं॥ दू
र्वांकुरोशीरशमीशिलाजित्सर्वार्थसर्वौषधिपंचमृद्भिः॥ स्नानं विदध्याद्ग्रहणे खींदोः पीडाकरं शांतिवहा हि
यस्य॥ अद्भुतसागरे भार्वर्गव॥ यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते॥ राज्यभंगं सुहृन्नारां मरणं चा
त्र निर्द्दिशेत्॥ राज्यनक्षत्रं राज्याभिषेकनक्षत्रं॥ अथ न विनायकशांतिः॥ अत्र ब्राह्मणैः क्षत्रियैर्वैश्यै
ः शूद्रैश्च सिद्धिकामुकैः॥ कर्मनिर्विघ्नसिध्यर्थं सुपूज्यस्त्वंगजानतेति लिंगात्॥ यजमानस्तु शूद्रश्चेद्द्विजै
स्तां नियोजयेत्॥ इति महार्णवाच्च॥ शूद्रस्याप्यधिकारः याज्ञवल्क्यः॥ विनायकः कर्मविघ्नसिध्यर्थं विनि
योजितः॥ गणानामाद्विधिपत्ये रुद्रेण ब्रह्मणा तथा॥ कर्मणां विघ्नाघसिध्यर्थं चेत्यर्थः॥ नेनोपसृष्टो यस्त

स्य लक्षणानि निबोधत॥ स्वप्नेव गाहतेत्यर्थं जलं मुंडांश्च पश्यति॥ काषायवाससश्चैव क्रव्यादांश्चाधिरो
हितः॥ अंत्यजैर्गर्दभैः सहैकत्रावतिष्ठते॥ व्रजन्नपि तथात्मानं मन्यते नुगमं परैः॥ स्वप्न इति सर्वत्र संबध्यते
॥ भविष्ये॥ तैलार्द्रगात्रं विधुरं करवीरविभूषितं॥ प्रत्यक्षदर्शनानि॥ याज्ञवल्क्ये॥ विमानाविफलारंभः संसी
दत्यतिमित्ततः॥ तेनोपसृष्टो लभते न राज्यं राजनंदन॥ कुमारी न च भर्त्तारमपत्यं गर्भमंगना॥ आचार्यत्वं श्रोत्रि
यश्च न शिष्योध्ययनं तथा॥ वर्णिग्लाभं तवाप्नोति कृषिं चापि कृषीबलः॥ स्नपनं तस्य कर्त्तव्यं शुभेह्नि वि
धिपूर्वकं॥ तस्य विनायकोपसृष्टस्य॥ पुण्येह्नि यस्मिन् कस्मिंश्चित् यत्तु॥ शुक्लपक्षे चतुर्थ्यां च वारे वा
धिषणस्य च॥ निष्ये च वीरनक्षत्रे तस्यैव पुरतो येत्यपरार्के भविष्यं तच्छीकामस्नपनं परं॥ धिषणस्य पि
गुरोः॥ तस्य विनायकस्य अत्रादौ देवतापूजोक्तापरार्के भविष्ये॥ व्योमकेशं तु संपूज्य पार्वतीमजं तथा॥ कृ
ष्णस्य पितरं तात अर्कमारं सितं तथा॥ द्विषणं क्लेदपुत्रं च कोणं लक्ष्यं च भारत॥ विधुंतुदं कंस्य च धारिणं॥
व्योमकेशः शिवः॥ भीमजो गणेशः॥ आरो भौमः सितः शुक्रः॥ क्लेदपुत्रो बुधः॥ कोणः शनैश्चरः॥ लक्ष्म॥ तद्वां

श्चंद्रः॥ बाहुलेयः स्कंदः॥ याज्ञवल्क्यः॥ गौरसर्षपकल्केन साज्येनोत्सादितस्य च॥ सर्वौषधैः सर्वगंधैर्विलिप्त
शिरस्तथा॥ भद्रासनोपविष्टस्य स्वस्तिवाच्यो द्विजाः शुभाः॥ उत्सादितस्य उद्वर्त्तितांगस्य सर्वौषधानि॥ मात्स्ये॥ स
हदेवी वचा व्याघ्री बला चातिबला तथा॥ शंखपुष्पी तथा सिंही अष्टमी तु सुवर्चला॥ महौषध्यष्टकं ह्येतन्महा
स्नानेषु योजयेत्॥ महार्णवे त्वन्यान्युक्तानि॥ मुरामांसी वचा कुष्ठं शैलेयं रजनीद्वयं॥ सटी चंपकमुस्ता च सर्वौ
षधिगणः स्मृतः॥ याज्ञवल्क्यः॥ अश्वत्थानाद्गजस्थानाद्वल्मीकांत्संगमाह्रदात्॥ मृत्तिकां रोचनां गंधं गुग्गुलं च
विनिक्षिपेत्॥ या आहृता द्व्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात्॥ कलशैराहृता स्वप्सु क्षिपेदित्यर्थः॥ अत्र विशेषो वै
जवाय गृह्ये॥ चतुःप्रस्रवणेभ्यश्चतुरः कुंभानाकृत्य तेषु सर्वौषधीं सर्वगंधां हिरण्यं व्रीहियवौ गुग्गुलमृदमा
खूत्करमिति प्रक्षिपेदिति प्रक्षिपेदिति शेषः॥ याज्ञवल्क्यः चर्मण्यानडुहे रक्ते स्थाप्य भद्रासनं ततः॥ सहस्राक्षं शत
धारमृषिभिः पावनं कृतं॥ तेन त्वामभिषिंचामि पावमान्यः पुनंतु मे॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पति
॥ भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि॥ ललाटे केशयोरक्ष्णोराप

स्तद्घनुसर्वेश॥पूर्वोक्तिकलशत्रयेणैकोमंत्रश्चतुर्थमंत्रत्रयमितिविज्ञानेश्वर॥सर्वेकलशेषुमंत्रत्रयमि
त्यपरार्के॥युक्तंचैतदेवंविनिगमकाभावात॥स्नानस्यपार्षणेतैलंखुवेणोदुंबरेणवनु॥जुह्वयान्मूर्धनिकुशान्मध्ये
नपरिगृह्यच॥मिनश्चसमिनश्चैवनथाशालकटंकटौ॥कूष्माण्डोराजपुत्रश्चत्येतेस्वाहासमन्वितैः॥पूर्वोक्त
विधेषणेतामभिस्तैलंकृत्वाचरुश्चपयित्वापूर्वोक्तनामभिर्हुत्वाचरुशेषेणज्ञाहिनामभिबलिंहरेत्॥हिमि
विज्ञानेश्वरः॥अपरार्केतुपूर्वोक्तचतुर्नामभिस्तैलंकृत्वानैरृतनामभिः॥कताकृताहिबलिंहरेयः॥चरुहोमा
नास्तेवेत्युक्तं॥हरेच्चतुष्पथेभूतेकुशानास्तीर्यसर्वतः॥कृताकृतोस्तुलोश्चयलोहनमेवच॥मत्स्यान्प
शूंस्तथाचामान्मांसमेतावदेवनु॥मांसमत्स्यभिन्नं॥एतावदितिपक्वमयंकंचेत्यर्थः॥तिलपिष्टमिश्रौदनः
पललौदनः॥पुष्पंचित्रंसुगंधंचसुराचविविधामपि॥मूलकंपूरिकापूपास्तथैरंडोद्भवंफलं॥हरेन्नरोपा
यसंचैवगुडमिश्रंसमोदकंपूरिकंग्राह्यमितिमहार्णवे॥तद्वकारपिष्टविकारइतिविज्ञानेश्वरः॥ब्राह्मणो
कपिसुरानग्राह्या॥सचयवैरणमांसुपेक्षीनग्रासेत्युक्तं॥महार्णवे॥तत्रमूलंमस्यं॥मूलकंप्रसिद्धंग्रास

मितिमहार्णवे॥तद्वकारपिष्टविकारइतिविज्ञानेश्वरः॥उद्उंबरकस्वनुःस्रुग्पूपाइत्यपरार्के॥महार्णवेतु॥
चर्मुस्रैश्चनुरस्रैश्चहीर्घैःपिष्टविकारकैर्निर्मिताःस्रुजउच्यंते॥उद्उंबरकसमाख्येयंसुक्॥गुडमिश्रंयपिष्टमि
तिशेषः॥मोदकालड्डुकाः॥बृहत्यराज्ञारेणकुष्मांडफलानिवेत्यधिकमुक्तं॥एतत्सर्वंएकस्मिन्मूर्धनि
धायमरुन्निवेदयेदित्यर्थः॥एतान्सर्वानुपाहृत्यभूमौकृत्वातताःशिरः॥विनायकस्यजननीमुपतिष्ठन्नो
बीक॥इदंमर्घंपवुणोणाहत्वार्घंपूर्णमंजलिं॥रूपंदेहियशोदेहिभगवतिदेहिमे॥पुत्रान्देहिमेधनंदेहि
सर्वकामांश्चदेहिमे॥विनायकोपस्थानेभगवन्नित्यहइतिविज्ञानेश्वरः॥ततःशुक्लांबरधरःशुक्लमाल्यानुले
पन॥ब्राह्मणान्भोजयेत्पश्चाद्स्वयुग्मंगुरोरपि॥एवंविनायकपूजयहोश्चैवविधानतः॥कर्मणांफलमाप्नो
तिश्रियमाप्नोतिश्रियमाप्नोमनुत्तमं॥अथमिताक्षरानुत्तमं॥अथमिताक्षरानुसारीप्रयोगः॥मुनेस्तेनवि
नायकोपसर्गमिहत्यर्थकर्मफलसिध्यर्थंवास्मीप्सार्थंवाविनायकःकांतिंकरिष्यइतिसंकल्पयेत्॥केवि
दमिश्राद्मिच्छंति॥ततआचार्यंचतुरःऋत्विजश्चवृणीत॥पराशरमतेष्टोततआचार्योमयोपसिसेरेशेपंचव

र्गेभ्र्देशसनार्थमेकं स्वस्तिकं कृत्वातस्मिन्पूर्वोदिदि।सुचंचुरः स्वस्तिवाचकानृत्विग्भिः कारयित्वामध्यस्वस्तिकेर
क्तमानडुहंचर्मोत्तरलोमयुक्तंगरुडंवास्थाप्यतस्मोपरिश्रीपर्णं पात्रंसंस्थाप्यश्वेतवस्त्रेणाच्छाद्येत॥ततोऽत्विजा
अनुर्दिक्षुस्वस्तिकेषुचंचुरःकलशान्क्षरन्तंचर्चितान्सग्रामंवेष्टितंकंठात्तनवाहतवस्त्रभूषितान्धान्यराशौ
निधायहरेरंकेननरसंगमोरंकेनवापूर्यौदुंबरामिवगृहेणकुंभेनरानवाकुना॥मन्त्रिकेहरेमेपापंयन्मयाकृ
तंकृतमिति॥कुंभेषुपंचमरत्नंप्रक्षिप्यगंधद्वारामितिवस्त्रागुरुकस्तूरीकर्पूरादीन्गोरोचनगुग्गुलसरक्ता
दिपल्लवान्निक्षिप्यपूर्णपात्रनिधानंतेकलशास्मुखेरक्तवस्त्रादिपवित्वाकुंभेषुत्वन्नोःसंयेत्वरुणमावास्वषोऽग्नोपचारपूजांपंचोपचारपूजांवानिर्वर्त्यनोमरुद्भ्यादिकांशान्नोवातःपवतामित्यादिकां
वाऽपोअस्मासुमातरःशुंधयंतुघृतेनेत्यंतंपठेयुः॥आचार्योभद्रासनस्योत्तरभागेऽग्न्यादिकोणेवाविनायकं॥तज्जननीमंबिकां
चपीठादिस्थापितप्रतिमयोःपूजयेत्।तत्रमंत्रौ॥तत्पुरुषायविद्महेवक्रतुंडायधीमहि॥तन्नोदंतिःप्रचोदयात्
॥सुभगायैविद्महेकामकामायैधीमहितन्नोगौरीप्रचोदयात्॥ततःस्तंभेवेद्यांमकेशं॥पार्वती॥भीमजोवसुस्वं

ग्रकेमंगलंशुक्रंबृहस्पतिंबुधंशनैश्चरंचंद्रंराहुंकेतुंविघ्नेशं॥एतान्संपूज्यगंधोक्तविधिनाग्निप्रतिष्ठाप्यान्
दृष्ट्वानाज्यंप्रधानंमितसंमितंशालेकरंकृष्णाजिनपुंचंचैकैकयावद्वीकृत्येत्यादिचरुंश्रपयेत्॥यज्ञमा
नेगवाज्यंलोलीरूनेनगोरसर्षपकल्केनोद्वर्तितांगंसर्वौषधचूर्णैश्चरनारुकस्तूरिकादिमिश्रंसिलशिरत्नशास
नउपविश्यस्वगृह्योक्तमार्गेणस्वस्तिवाचनंकुर्वीत।ततआचार्योजीवत्पतिपुत्राभिःसुवेषाभिःकृतमंगलंयज
मानमभिषिंचेत्॥पूर्वंकलशमादाय॥सहस्रंसंशतधारमृषिभिःपावनंकृतं॥तेनत्वामभिषिंचामिपावमान्यः
पुनंतुमे॥इत्यभिषिंचेत्॥ततोदक्षिणंकलशमादाय॥भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः॥भगमिंद्रश्चवायुश्च
भगंसप्तर्षयोददुः॥इत्यनेनापश्चिमंकलशमादाय।यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनिललाटेकर्णयोरक्ष्णोरा
पस्तद्घ्नंतुसर्वदा॥इत्यनेनातत उदीच्यंकलशमादायपूर्वोक्तैस्त्रिभिर्मंत्रैरभिषिच्य।बृहत्पराशरोक्तंभिषिंचेत्।
एतद्वैपावनंस्नानंसहस्रंसऋषिभिःस्मृतं॥तेनत्वाशतधारेणपावमान्यःपुनंत्विमा॥चाक्षुषीब्राह्मीसाव्रह्मणः
केशवात्ययः॥आयुस्तेघ्नंतुदौर्भाग्यंशांतिरस्तुसर्वदा॥सुमित्रियान्नऽइमः॥समुद्रंगिरयोनद्योमुनयश्चपतिव्रता

ॐ सौभाग्यघृतेसर्वेशांतिंयछंतुसर्वदा॥पादगुल्फोरुजंघाश्चजितेबोदरनाभिषु॥स्तनोरोवाकुक्षस्थायीवाग्यंसांग
संधिषु॥नासास्तास्टकर्णकेक्षेशोतेपुचयतस्थितं॥तद्वापोघंतुसौभाग्यशांतिंयछंतुसर्वदा॥एवमभिषिच्ययजमा
नस्यपश्चान्निरस्यपाणिंगृहीतकुशांतरितेयजमानमूर्धनिसार्षपंतैलमौदुंबरेणस्रुवेणजुहुयात्॥ॐसंमि
तायस्वाहा॥ॐसमितायस्वाहा॥ॐगोपायस्वाहा॥ॐकरंकायस्वाहा॥ॐकूष्मांडायस्वाहा॥ॐराजपुत्रायस्वाहा॥यज
मानस्त्रागंकुर्यात्॥इध्माधानादिकृत्वाचरुणापूर्वोक्तपूर्वोक्तैः षड्भिर्मंत्रैश्चरुंकृत्वाप्रणीताविमोकांतंकृत्वाचरुशे
षेणाग्नेरभिषेकशांतायांचेशादिदिक्षुलोकपालेभ्योबलिंदद्यात्॥इंद्रायनमः॥अग्नयेनमः॥यमायनमः॥नैर्ऋतये
नमः॥वरुणायनमः॥वायवेनमः॥कुवेरायनमः॥ईशानायनमः॥ब्रह्मणेनमः॥अनंतायनमः॥अथयजमानस्त्रा
त्वाशुक्लमाल्यांबरेधरोगुरुणासहितोविनायकायांबिकायैचकृताकृतंदुलयुक्तोऽनपक्वापक्वमन्नपक्वाप
क्वमांसत्रिविधसुरामूलकापूपपूरिकोडेरकहरिद्रान्नपायसगुडमिश्रपिष्टलड्डुककुल्माषफलानिपूर्वोक्तमंत्रा
भ्यांविनायकायांबिकायैचैतमुपहारंहरामीतिस्वाशिरसाभूमिंगत्वाकुसुमसहितेनोत्थितेनपूर्वोक्तमंत्राभ्यां

अर्घंदूर्वासर्षपपुष्पाणिसंचरत्वाविनायकमंबिकांनोपतिष्ठेत्॥रूपंदेहियशोदेहिभगंभगवतिदेहिमे॥पुत्रान्
देहिधनंदेहिसर्वकामांश्चदेहिमे॥इतिविनायकं॥रूपंदेहियशोदेहिभगंभगवतिदेहिमे॥पुत्रान्देहिधनंदेहि
सर्वकामांश्चदेहिमे॥इत्यंबिकां॥ततःस्रुपेकुशानास्तार्यापहारशेषंतत्रतिधायचतुष्पथंगत्वातत्रमंत्रैर्बलि
दद्यात्॥बलिंगृह्णंत्विमेदेवाआदित्यावसवस्तथा॥मरुतोयाग्निनौनैरौद्राःसुपर्णाःपन्नगायक्षाः॥असुरायातु
धानाश्चपिशाचामानवेश्वराः॥शाकिनोयेचवैतालायोगिन्यःपूतनाःशिवाःजृंभकाःसिद्धगंधर्वानागाविद्या
धरानागाः॥हिक्कालाजौलोकपालाश्चयेचविघ्नविनायकाः॥जगतांशांतिकर्त्तारोब्रह्माद्याश्चमहर्षयः॥
माविघ्नमाचमेपापंमासंतुपरिपंथिनः॥सौम्याभवंतुतस्माश्चभूतप्रेताःसुखावहाः॥ततआचम्यगंधंगृहीत्वाचा
र्योयजमानस्तदंगुलित्रयेणोत्तानेनसव्येनहस्तेनयथाशक्तिरौप्यंवाऽक्षयंदक्षिणांहेमसूत्रेणादत्वाविनायकांबिकयोरुत्तरपूजांकृत्वाविसृज्याचार्याय
प्रतिपाद्यद्विधिभूतिंकृत्वाग्निंविसृज्यब्राह्मणान्भोजयेत्॥इतिहिनकरभट्टकृतेशांतिसारेविनायकशांति
ः॥अथरुद्रविधिः॥तत्रपुस्त्वरणेविधिर्हेमाद्रौ॥रुद्रमाराधयेत्स्वयंचीर्त्वापराकंचतथापुनः॥स्नात्वाईशंसमभ्यर्च्य

उषित्वा सप्तशर्वरीः॥ जपेद्रुद्रांस्तथा तप्त्वा तदंते प्राशयेद्घृतं॥ अपरेह्नि संजाते समाप्यैवं व्रतं पुनः॥ भास्कराभि
मुखो भूत्वा तद्दिने तान् जपेद्बहून् भूयश्चाह्निपरे रुद्रं संपूज्य विधिवत्ततः॥ घृताक्तैर्बिल्वपत्रैश्च रुद्रहोमं
प्रकल्पयेत्॥ एवं सम्यक्व्रतेनूनं कृते सौ जायते द्विजः॥ साक्षाद्रुद्रो महातेजास्ततः कामांस्तु साधयेत्॥ रुद्र
विनियोगस्त्रेधा॥ जपे होमे भिषेके च॥ रुद्राणां जपहोमार्चनविधिं व्याख्यास्याम इति महार्णवे बौधायनो
क्तेः॥ किं जप्येनामृतत्वं नो ब्रूहि शतरुद्रियकेणेति तत्रैव जाबालश्रुतेश्च॥ जपशब्देन केवलो जप उच्यते॥
॥ इति केचित्॥ अन्ये तु मंत्रजपमात्रे दशांशहोमस्यांगत्वाद्दशांशादिहोमविशिष्टो जपो विधीयत इत्याहुः॥ ए
तेन होमरुद्रे तर्पणादि अभिषेकरुद्रे च ब्राह्मणा वृध्या भोजनं सिद्धं॥ जपादिरुद्रश्च पंचधा रूपं रुद्रो रुद्री महारु
द्रो तिरुद्रश्चेति॥ एकादशगुणवृध्या॥ तत्र रूपं नाम नमकचमकस्वरूपं॥ अन्येषां लक्षणमाह॥ महार्णवे शातात
पः॥ षडंगैकादशी रुद्रो कादशरुद्रतः॥ एकादशभिरेताभिर्महारुद्रश्च कथ्यते॥ एकादशमहारुद्रैरतिरुद्र इति
रितः॥ अस्यार्थः॥ षडंगा षडंगन्याससहिता एकादशरूपाणां समाहारः एकादशी रुद्र इत्युच्यते॥ षडंगेत्युपलक्ष

णं॥ पंचांगरुद्राणामिति बौधायनोक्तेः॥ तत्पाठे च प्रकारो बौधायनेनोक्तः॥ नमस्ते रुद्र मन्यव इत्येकादशानामनुवा
कानामेकं जपेदिति॥ अस्यार्थः॥ सर्वनमकानुवाकान्पठित्वा पंचमकानुवाकं पठेत्॥ पुनः सर्वनमकानुवाकान्पठि
त्वा द्वितीयं चमकानुवाकं॥ एवमेकादशवारमिति॥ तथा च हेमाद्रौ कौशिकः॥ सद्यादिपंचवक्त्रांश्च चमकादिं ततो जपे
त्॥ पुनरेतज्जपेत्सर्वं द्वितीयं चमकं तथा॥ एवमेकादशगुणं क्रमेण चमकांस्तथा॥ रुद्रैकादशिनीत्वेषा सर्वकाम
फलप्रदा॥ एकादशगुणा सैव रुद्र इत्यभिधीयते॥ रुद्र एकादशगुणो महानित्यभिधीयते॥ महानेकादशगुणस्त्वतिरु
द्र इहोच्यते॥ अत्र चक्रभेदात्संज्ञाविरोधो न दोषाय॥ अथ रुद्रजपादिविधिः॥ हेमाद्रौ बौधायन॥ अथातः पंचांगरुद्राणां
न्यासहस्राणीति ललाटे हंसः शुचिषदिति॥ भ्रुवोर्मध्ये त्र्यंबकं यजामह इति नेत्रयोर्नमः स्रुत्यायेति कर्णयोर्मान
स्तोक इति नासिकायामचतत्येति मुखे नीलग्रीवौ द्वौ कंठे नमस्ते अस्वायुधायेति बाह्वोर्याते हेतिरित्यपबाह्वो
र्येतीर्थानीति हस्तयोस्सद्योजातमिति पंचानुकान् पंच स्वंगुलीषु नमो वः किरिकेभ्य इति हृदये नमो गणेभ्य इ
ति पृष्ठे नमो हिरण्यबाहव इति पार्श्वयोर्विजधनुरिति जठरे हिरण्यगर्भ इति नाभौ मीढुष्टम इति कट्यां॥ ये भूता

नामधिपतयइतिगुह्येसशिराजातवेदाइत्यपानेमनोमहांनइत्यूर्वोरेषनइतिजान्वोंससइज्जिहितिजंघयोर्वि
श्वभूतामितिगुल्फयोर्यथामितिपादयोरध्यवोचदितिकवचंनमोविल्मिनइत्युपकवचंनमोस्रुत्यायेचेतित्व
ती॥ यनेत्रेप्रमुचधन्वनेत्यस्त्रंयत्तावंतमेतिदिग्बंधः॥ ॐनमोभगवतेरुद्रायेतिनमस्कारंन्यसेत्॥ ॐकारंमूर्ध्विवि
न्यसनकारंनासिकायतः॥ मोकारंचुलकाद्देवंयकारंमुखमध्यतः॥ गकारंकंठदेशेतुवकारंहृदिविन्यसेत्॥ते
कारंदक्षिणेहस्तेरुकारंवामतोन्यसेत्॥ द्रकारंनाभिदेशेतुयकारंपादयोर्न्यसेत॥ सद्यजपादयोन्येस्ववामन्य
सोरुमध्यतः॥ त्रयोरुद्रहृदिविन्यस्यमुखेतत्सुरुषंन्यसेत॥ ईशान्यंमूर्ध्विविन्यसहंसोनामशिरोवाहमहंसेतियो
ब्रूयाद्धंसोनामसशिवः॥ एवंन्यासविधिंकृत्वाततःसपुरमारभेत॥ ज्ञातारमिड्यंस्रष्टारमुग्रंपथामसु
न्वंततत्वायामिश्रानोनियुद्भिर्वेयंसोमतमीशानमस्मेरुद्रायोनाएथिवीत्येतंसपुरमिद्रहीनहिंसुविन्यसे
वमेवात्मनिरौद्रीकरणंकृत्वात्वगस्थिगतैःपापैःप्रमुच्यतेसर्वैर्मृतेष्वपराजितोपराजितोभवति॥ यस्यगंध
र्वेमूतप्रेतपिशाचब्रह्मराक्षसयमदूतशाकिनीडाकिनीसपश्चापरतस्कराघपइवासर्वेज्वलंतंपश्यंतुमा॥

रक्षंतु॥ मनोज्योतिरबोधन्यग्निर्मूर्द्धानमर्मोशिज्ञानवेदाइतिगुह्यं॥ नाभिहृदयमुखंचि॥ रस्त्वमिमन्यात्मरक्षाकवचं
शिवसंकल्पहृदयंपुरुषसूक्तंशिरउत्तरनारायणंशिखाअप्रतिरथंकवचंशतरुद्रियमस्त्रंपंचांगसरुज्ञापेर
क्षांगप्रणम्याहिरण्यगर्भोयःप्रणतोमहीधारुपश्चासव्यासनेयइमंयमायातेयेयजामहेत्यष्टौकवोजपेद्
थात्मानंरुद्ररूपंध्यायेत॥ शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकं॥ गंगाधरंदशभुजंसर्वाभरणभूषितं॥ नील
ग्रीवंशशांकांकंनागयज्ञोपवीतिनं॥ व्याघ्रचर्मोत्तरीयंचवरेण्यंपरमंभजे॥ कमंडल्वक्षसूत्रीभ्यामन्वितंभूसपा
णिनं॥ ज्वलंतंपिंगलजटाशिखमुद्योतकारिणं॥ उमयातेनाशुतंहृदमुमादेहार्धधारिणं॥ दिव्यसिंहासनासीनंदि
व्यभोगसमन्वितं॥ दिव्यैश्वर्यसमायुक्तंसुरासुरनमस्कृतं॥ निरंजनंशाश्वतंशुद्धंध्रुवंसर्वंरमव्ययं॥ सर्वव्या
पीनमीशानंरुद्रंवैविश्वरूपिणं॥ एवंध्यात्वाद्विजःसम्यक्ततोयजनमारभेत॥ हंसऋषिः॥ ईशानमूर्ध्विविन्य
सहंसहंसेतिब्रूयात॥ एवमुक्तेहंसनामासशिवोभवतित्यर्थः॥ अत्रपंचन्यासाउक्ताः॥ शिरवाद्यस्त्रांतमेक
त्रिंशद्गन्यासःप्रथमः॥ मूर्द्धादियाहृदंतंद्वात्रिंशन्न्यासोद्वितीयः॥ पादादिमूर्द्धांतंपंचाशन्न्यासस्तृतीयः॥ गुह्यादिमस्तकं

तं पंचांगन्यासश्चतुर्थः॥ हृदयायस्त्रांतं पंचांगन्यासः पंचम इति॥ पंचांगं रुद्राणामिषुपक्रमाद्बौधायनः॥ मते पंचै
वन्यासः॥ शांतातपेन तु षष्ठोपि न्यास उक्तः॥ षडंगैकादशी रुद्र इत्युक्तेः॥ स च प्रजननादि सर्वांगपर्यंतं षोडशांगेषु कर्त्त
व्यः॥ बोधायनेनाभिषेकप्रकरणे तदुक्तेरिति महार्णवः॥ हेमाद्रौ तु कौशिकेन संकल्पजपहोमौ त्वित्युक्तम्न्यासद्वयं प्र
कारांतरेणोक्तं॥ न्यासं भवादिभिः कुर्यान्नमोंतैः प्रणवान्वितैः॥ भवं च पादयोर्न्यस्य शर्वं न्यस्योरुमध्यतः॥ ईशानं गुह्यदेशे
तु नाभौ मशुपतिं यजेत्॥ रुद्रं च हृदये न्यस्य मुखे चोग्रं तु विन्यसेत्॥ भीमं ललाटं यदेच महांतं शीर्षि विन्यसेत्॥
तथैवांत्यानुवाकस्य मंत्रैर्द्वादशभिः शुचिः॥ न्यासं कृत्वा तु लोभ्येन वर्जयित्वाभिचारिकं॥ आद्यं तु पादयोर्न्यस्य द्विती
यं जानुदेशतः॥ कुर्वीत तृतीयं विन्यस्य चतुर्थं गुह्यदेशतः॥ पंचमं वामदेशे तु षष्ठं तु हृदये न्यसेत्॥ सप्तकं वदेशे
तु मुखे चाष्टममुत्तमं॥ नवमं नासिकायां तु नेत्रयोर्द्वयोः॥ एकादशं ललाटे तु द्वादशं शिर्ष्णि विन्यसेत्॥ त्रयोद
शं तु कवचं कृत्वा स्त्रे तु फट् तत इति॥ अथ रुद्रहोमविधिः॥ हेमाद्रौ बौधायनः॥ रुद्रैकादशिनीजाप्ये त्रयस्त्रिंश
दथाहुतीः॥ रुद्रेशतत्रयं प्रोक्तं षष्ट्या त्र्यधिकया युता॥ रुद्रे लघुरुद्र इत्यर्थः॥ चत्वारश्च महारुद्रे सहस्राः सप्त वर्जि

ताः॥ चत्वारिंशत्सहस्राः कर्त्तव्याश्च कर्त्तव्याश्चतुरुत्तराः युताश्च सप्त सप्ताह्यतिरुद्रे विनिश्चयः॥ होमश्च नमः शंभ
वेति मंत्रेणेति हेमाद्रिः॥ तथा च तन्मते मंत्रविभागो होमो नास्ति॥ महार्णवस्तु श्रुतिषु नानाविधिमंत्रविभागान्मानं च य
न प्रकरणस्य मथपेक्षितत्वात् ग्राह्यमित्याह॥ तत्र होमस्त्रेधा॥ समग्रहोमो दशांशहोमः॥ शतांशहोमश्चेति॥ तत्राद्यः
प्रधानभूतो जपांगभूतश्च॥ उत्तरौ त्वंगभूतावेवेति॥ महार्णवः॥ त्रिष्वपि च पक्षेषु मंत्रविभागः षोढा एकत्रेधा षोडशधा
अष्टाचत्वारिंशद्वा॥ एकोनसप्तत्युत्तरशतधा चेति॥ तत्र त्रेधा विभागस्त्रेधा विभक्तं जुहोति त्रय इमे लोका इति॥ श्रुत्यो
क्तः॥ षोढा विभागोपि तिस्र उत्तरा आहुतीर्जुहोति षट्त्वं पद्यंते षड्वा ऋतव इति श्रुत्योक्तः॥ षोडशधा विभागोपि वा प्रथ
मादुपक्रम्य नमस्तक्षभ्यजानुघ्ने धारयमाणो जुहोति रथकारेभ्यश्च व इत्युपक्रम्य नमः स्वायुधायेति नाभिदघ्ने शेषे
ण प्रगवतानेभ्यश्च स्यदघ्ने धारयमाणो नमो रुद्रेभ्यो येंतरिक्षे इति नाभिघ्ने नमो रुद्रेभ्यो ये दिवीत्यास्यदघ्ने हुत्वेति बौधा
यनोक्ताः॥ एकोनसप्तत्युत्तरशतविभागस्तु अर्थैकत्वादेकवाक्यमिति॥ न्यायेन शाकपूण्याद्युक्तोभयतो नमस्का
रत्वादित्वाच सिद्धः॥ तत्र प्रथमानुवाकः॥ पंचदशर्च इति पंचदशमंत्राः॥ द्वितीये त्रयोदश यजूंषीति तावंतः॥ तृतीयचतु

र्थयोः प्रत्येकं सप्तर्चस्य ऋषिः पंचपदस्यः प्रत्येकं पंचर्चस्य ऋषिः॥ सप्तमेषोऽनु॥ अष्टमे सप्तर्चस्यानि नवमेऽनु
विंशतिः॥ इत्यमेधाद्यार्चः॥ एकाद्योऽनुवाकः स्त्रीणि च यजूंषीत्येकोनसप्तत्युत्तरशततमेंऽनुः॥ अस्मिन्नुपश्लेऽनुवा
कमारभ्यमवमानुवाकपर्यंतेनमस्काराहिनमस्कारांतप्रकंयजुरित्याकपूर्णिः॥ नमस्कारांतंयंयजुरित्या
दिः मध्यमेषष्ठकाकपूर्णिविहितमुभयोनमस्कारत्वेहिनीयतृतीयचतुर्थानुवाकविषयं॥ यास्कोक्तंचनमस्का
राहित्वेपंचमादिनवमांतंतथाशिष्टावाराहित्याह॥ अस्मिन्नुपश्लेरेवानोहृदयेमइतिमंत्रशेषस्तुत्तर
मंत्रेचनुदृश्यतेनुषज्यते॥ जयाहोनुकिनाणामावाचानुषंगाः॥ अष्टाचत्वारिंशद्भिर्भागस्तूक्तअष्टाचनुवाकाः॥ अष्टौ
यजूंषीतिकाण्वशुक्लयोरेकैकेद्वितीयानुवाकप्रभृतिभवमांतेरष्टौमंत्राः॥ इतरानुवाकेषुत्वेनंतरपश्लेकोमंत्रवि
भागइति॥ तत्ररुपजेपश्लेशंहोमोनास्तिइत्याचारंजपामावात्॥ एवमेकादशिनीजपेशंतांहोमोनास्तिएकाद
शिइशंहोमेएकैकेनैवरूपेणहोमः॥ आवशिष्टेकरूपस्यइशंहोमोनास्ति॥ एवंसघुरुद्रमहारुद्रावप्य
वशिष्टरूपस्यसनास्तीतिमहार्णवः॥ पितृवरणास्करूपाकुतीनांइशंसमाचारइत्याचत्वारिंशत्यश्लेपंचाकृत

यः॥ एकोनुसप्तत्युत्तरशततपश्लेससप्तर्चाताभ्योर्घमंत्रैराघनैर्वाएवमेकादशीन्यादिनपेपिअवशिष्टरुपेइशं
शःसंभवतीत्याकुः॥ अत्रमूसनलघुकेत्ववशिष्टरुपेपूर्वोक्तवचनात्नमः॥ शंभवमंत्रेणहोमइत्याकुः॥ एवंमहारुद्र
हावपिद्रष्टव्यं॥ अथवषोडशिनागोनमकेषष्ठवाचमकेषुतुविभागमाह॥ महार्णवेवौधायन॥ अमाविगुसजो
वयेतिचनुगृहीतेकृत्वावाजश्चमेप्रसवश्चमइतिसंततंवसोर्धारांनुहोत्यामंत्रसमापनादितिश्यामंत्रसमापनादिति
सर्वेसमकानुवाकेरेकाकृतिरित्यर्थःतथाचसर्वनमकानुवाकहोमांतेअग्नाइत्येकाकृतिः॥ अवशिष्टचमकाध्यायेन
परेत्याकृतिरयमितिकेचित्॥ अन्येत्वनुवाकनेहदेवदितीयाद्यनुवाकेषुमंत्रभेस्मिन्प्रथमानुवाकसमाप्तिरचा
त्रोच्यतेतथाचाद्यचमकानुवाकेरेआकृतीः॥ द्वितीयाद्विचमकानुवाकेरेशंताकृतयतथाचरेवाकृतीनांइशंवाकृतय
इतिपश्लद्वयेसिद्धयंसिद्धं॥ तृतीयेपिपश्लेयंसिद्धोमहार्णवउक्तः॥ तथाहि॥ नमस्तेरुद्रमन्यवइत्येकाशंनामनुवाका
नामेकमेकंजपेदितिसौधायनेनद्वितीयाद्विहाद्यस्यापिचमकानुवाकस्यसमस्तनपेराकमंत्रत्वेबोधितंजपानुसारी
वहोमः॥ अतःसर्वनमकानुवाकहोमांतेसमस्ताद्यचमकानुवाकेनहोमएषमुत्तरेषष्यनुवाकेद्वित्येकाशंकृतयइ

ति॥ अयमेव च पक्षो मुख्यः आहुतिगणनायामस्यैव तेनोक्तः॥ इदानीं तु शिष्टा द्वादशाहुतिपक्षमाश्रित्य दशाहुतिपक्षमेव
कुर्वंति॥ अथैकादशिन्यादिहोमे कुंडं निर्णयार्थं चमकद्वादशाहुतिपक्षमाश्रित्य दशांशहोमे चाचशिष्टरूपाहुतित्या
गमाश्रित्याहुतिसंख्योच्यते॥ एकादशिन्यां समग्रहोमे प्रतिमंत्रपक्षे आहुतयः एकसप्तत्यधिकादशती द्विहस्तं कुंडं
॥ तत्रैवाष्टाचत्वारिंशत्पक्षे चत्वारिंशदधिकापंचशती एकहस्तं कुंडं॥ लघुरुद्रे समग्रहोमे प्रतिमंत्रपक्षे विंशति
साहस्री पंचशतानि एकाशीतिश्च॥ त्रिहस्तं कुंडं॥ तत्रैवाष्टासत्वारिंशत्पक्षे पंच सहस्राणि नवशतानि चत्वारिंश
च्च द्विहस्तं कुंडं॥ महारुद्रे समग्रहोमे प्रतिमंत्रपक्षे लक्षद्वयं षड्विंशति सहस्राणि त्रिशती कनवतिश्च॥ षट्हस्तं कुं
डं॥ तत्रैवाष्टचत्वारिंशत्पक्षे पंचषष्टिसहस्राणि शतत्रयं चत्वारिंशच्च चतुर्हस्तं कुंडं॥ अतिरुद्रे समग्रहोमे प्रति
मंत्रपक्षे चतुर्विंशतिलक्षाणि॥ नवतिसहस्राणि एकाधिकशतत्रयं च अष्टहस्तं कुंडं तत्रैवाष्टाचत्वारिंशत्पक्षे
सप्तलक्षाणि अष्टादशसहस्राणि सप्तशती चत्वारिंशच्च षट्हस्तं कुंडं॥ एकादशिनीजपदशांशहोमे प्रतिमंत्रपक्षे
एकाशीत्यधिकशतं एकहस्तं कुंडं॥ तत्रैवाष्टाचत्वारिंशत्पक्षे षष्टिः॥ अरत्निकुंडं॥ लघुरुद्रे जपदशांशहोमे प्र

तिमंत्रपक्षे द्वे सहस्रे द्विपंचाशच्च॥ द्विहस्तं कुंडं॥ तत्रैवाष्टाचत्वारिंशत्पक्षे षट्शती॥ एकहस्तं कुंडं॥ महारुद्रजपदशां
शहोमे प्रतिमंत्रपक्षे द्वाविंशति सहस्राणि षट्शती त्रयस्त्रिंशच्च॥ चतुर्हस्तं कुंडं॥ तत्रैवाष्टाचत्वारिंशत्पक्षे षट्सहस्रा
णि पंचशतानि चत्वारिंशच्च॥ द्विहस्तं कुंडं॥ अतिरुद्रजपदशांशहोमे प्रतिमंत्रपक्षे लक्षद्वयं एकोनपंचाशत्सहस्राणि
चतुर्विंशतिश्च षट्हस्तं कुंडं॥ तत्रैवाष्टाचत्वारिंशत्पक्षे एकसप्ततिसहस्राणि अष्टशती अशीतिश्च चतुर्हस्तं कुंडं॥ त्रिधा
विभागादिपक्षास्तु न प्रचरंतीति तद्गणनानोक्ता॥ रुद्रे मंडपपरिमाह॥ परशुरामः॥ मंडपोष्टगुणः कुंडात्कुंडहोमानुसार
तः॥ अथ रुद्रवेदिः॥ तत्र रुद्रहोमस्य ग्रहमखविकृतित्वादीशानकोणे रुद्रवेदिः॥ ग्रहवेदिरपि तत्रैवेति केचित्॥
कुंडस्य प्रागुदीच्यां वा प्राच्यामुत्तरतोपि वा चतुरस्रं चतुर्द्वारं कर्तव्यं ग्रहपीठकमिति गोभिलोक्तेः प्राच्यामुदीच्यां
चेत्यन्ये अपरे तु ग्रहवेदिरेव रुद्रवेदिः॥ अतिरिक्ततत्सत्ते प्रमाणाभावादिति वदंति॥ वयं तु रुद्रहोमे मंत्रहो
मत्वात्तांत्रिकी वेदिः॥ तथा च मंडपमध्यनवमांशे तुलापुरुषवद्वेदी॥ कार्या॥ कुंडं च तदीशाने नेलावत्॥ ग्रहवे
दिस्तु कुंडादीशानादौ मंडपांतर्बहिर्वा ग्रहमखे तथाविधानात्॥ न च रुद्रहोमस्य नियतं शांतिरूपत्वं येन ग्रहम

खविकृतिन्वंस्यात्॥ काम्यस्यापि तस्य सत्वादिति वदामः॥ गुर्जरपरशुरामोपि॥ तत्रैका वेदिका कार्या॥ यज्ञमंडपमध्यत
॥ मध्यस्तंभांतरं यावन्मानाकरोच्छ्रयेत्याह॥ महार्णवस्तु कुंडमंडपऋत्विक्संख्यावमोर्द्वारादिवायुतादिहोमवत्का
र्यमित्याह॥ अत्र रुद्रयंत्रं वेद्यपरिवस्त्रे शिष्याः कुर्वंतीति तदुच्यते॥ स्कंदे॥ प्रणम्य जगतामीशमुमादेहार्ध
धारिणं॥ यत्रोद्धारमहं वक्ष्ये रुद्रकल्पानुसारतः॥ मध्ये वृत्तं समालिख्य तन्मध्ये वदशाक्षरं॥ बहिरष्टदलं प
द्मं ततः षोडशयंत्रकं॥ चतुर्विंशतिपत्राब्जं द्वात्रिंशत्पत्रकं तथा॥ चत्वारिंशत्पत्रकं तु वृत्तं सूर्यसमप्रभं॥ पंचपद्मात्म
कं वृत्तं चतुरस्रं च नूगहं॥ सत्वं पूजस्तमश्चेति त्रिगुणैः परितो वृतं॥ चतुर्द्वारदेशे बहीर्नागसमावृतं॥ रुद्रपीठमिति
स्यात्तं देवतास्तत्र विन्यसेत्॥ चत्वारिंशच्छतं चैकं दैनानानामुदाहृतं॥ कर्णिकामध्ये देशे तु रुद्रं पंचास्यमालिखेत्
॥ नमो भगवते रुद्राय इति तारादिकं न्यसेत्॥ सोयं दशाक्षरो मंत्रः सर्वकामार्थसिद्धिदः॥ प्रणवादिनमोंतानि पंचा
स्यानि ततः परं॥ सद्योजातं वामदेवमघोरं तदनंतरं॥ ततस्तत्पुरुषं प्रोक्तमीशानं पंचमं क्रमात्॥ प्रधानमिदमा
ख्यातं प्रथमावरणे ततः दलेष्वष्टसु तद्दादिन्पूर्वादिक्रमतो न्यसेत्॥ पूज्यपूजकयोर्मध्ये प्राचीस्याद्यंत्रसेख

ने॥ आग्नेयं नंदिमहाकालौ गणेशवृषभाक्रमात्॥ अनंतरं भृंगिरीटिस्कंदोमाचंडसंज्ञकः॥ षोडशारे ततः पद्मे द्वितीया
वरणे यजेत्॥ अनंतं च तथा सूक्ष्मं शिवं चैकपदं तथा॥ एकरुद्रं त्रिमूर्त्तिं श्रीकंठं वामदेवकं॥ ज्येष्ठं श्रेष्ठं तथा रुद्रं क
लविकरणं॥ बलं च बलविकरणं च प्रथमथनं तथा॥ तृतीयावरणे पद्मे चतुर्विंशद्दले तथा॥ अणिमा महिमा चेति
लघिमा गरिमा तथा॥ प्राप्तिः प्राकाम्यमीशित्वं वाष्टसिद्धयः॥ तत्परं क्रमेणैव न्यसेद्ब्राह्म्यादिदेवता॥ ब्राह्मी माहेश्वरी चै
व कौमारी वैष्णवी तथा॥ वाराह्यैंद्री च चामुंडा चंडिका चेति ताः क्रमात्॥ ततोष्टस्वसितांगादीन्भैरवान्विन्यसेत्पुनः॥ अ
सितांगो रुरुश्चंडः क्रोधउन्मत्तभैरवः॥ कालभीषणसंहारा भैरवाश्चाष्टकीर्त्तिताः॥ द्वात्रिंशत्पत्रके पूर्वं भवाष्टकमुदाहृ
तं॥ ततोनंतो वासुकिश्च तक्षकश्च कुलीरकः॥ कर्कोटकः शंखपालः कंबलोश्वतरस्तथा॥ ततोष्टसु न्यसेद्वैन्यं पृथुं हैह
यमर्जुनं॥ शाकुंतलेयं भरतं नलं राममिति क्रमात्॥ ततः कुलाचलानष्टौ दलेष्वष्टसु विन्यसेत्॥ हिमवान्निषधो विंध्यो मा
ल्यवान्पारियात्रकः॥ मलयो हेमकूटश्च गंधमादनसंज्ञकः॥ चत्वार्यावरणान्येव पंचमावरणे ततः॥ चत्वारिंशद्दले पद्मे
पंचमावरणे न्यसेत्॥ इंद्राद्यष्टौ लोकपालानष्टसु क्रमशो लिखेत्॥ इंद्रमग्निं यमं चैव नैर्ऋतिं वरुणं तथा॥ वायुं कुबेरमी

शोनंदलेघष्टसुविन्यसेत् इंद्रादिलोकपालानामष्टौशक्रीस्ततोलिखेत्॥शचीस्वाहाचवाराहीखड्गिनीवारुणीतथा॥मृ
गारूढाचकौवेरीशूलिनीचतथाष्टमी॥ततोष्टानामायुधानिवज्रादीन्यष्टसुन्यसेत्॥वज्रंशक्तिर्दंडखड्गौयाशांकुश
गदाअपि॥त्रिशूलंलोकपालानामायुधानिक्रमाल्लिखेत्॥ततोष्टौवाहनान्येषामष्टसुक्रमतोलिखेत्॥ऐरावतंतथा
मेषंमहिषंश्वेतसंज्ञितं॥मकरंचमुगंचैवनरंचवृषभंतथा॥ऐरावताकश्चदयोप्यष्टदिग्गजास्तदनंतरं॥ऐरावतपुंड
रीकोवामनःकुमुदोजनः॥पुष्पदंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः॥भूगृहांतःपुनर्लेख्याःपंचपद्मात्मकाद्बहिः॥
इंद्रंविन्यस्यपूर्वस्यामाग्नेय्यामग्निमेवच॥दक्षिणस्यांयमंचैवनैर्ऋत्यांनिर्ऋतिंतथा॥प्रतीच्यांवरुणवायुंवायव्यांवि
न्यसेत्ततः॥कुबेरंचैवकौवेर्यामीशान्यामीशमालिखेत्॥विरूपाक्षंतुविन्यस्येदाग्नेय्यमग्नियोगतः॥नैर्ऋत्यांनि
र्ऋतेर्योगेलिखेत्पशुपतिंतथा॥ईशान्यामूर्द्धलिंगंचन्यसेदीशानयोगतः॥प्रागादिक्रमतोलेख्याशेखाद्याभूगृहाद्ब
हिः॥विप्रवर्णंश्वेतरूपंसहस्रफणमंडितं॥शेषंविन्यस्यपूर्वस्यांपूजयेदुपचारकैः॥तक्षकंवैश्यवर्णंचनीलंपंच
शतैःफणैः॥युक्तमुत्तंगकायंचआग्नेय्यांदिशिविन्यसेत्॥अनंतंविप्रवर्णंचतथाकुंकुमवर्णकं॥सहस्रफणसंयु

क्तंदक्षिणस्यांप्रपूजयेत्॥वासुकिंक्षत्रियंपीतवर्णंसप्तशतैःफणैः॥युक्तमुत्तंगकायंचवायव्यांदिशिपूजयेत्॥
कंबलंशूद्रवर्णंचकृष्णंत्रिंशत्फणैर्युतं॥कौवेर्यांदिशिविन्यस्यपूजयेच्चविधानतः॥कर्कोटकंशूद्रवर्णंश्वेतंत्रिंश
त्फणायुतं॥ईशान्यांदिशिविन्यस्यपूजयेद्विधिवत्ततः॥रुद्रपीठमिदंसर्वंरुद्रकृत्येषुविश्रुतं॥शंभुनास्वयमाख्यातंभ
क्त्यानुग्रहकाम्यया॥कुंकुमागुरुकर्पूरैर्भूर्जपत्रेथवापटे॥लिखितंपूजितंभक्त्यासर्वकामार्थसिद्धिदं॥यंत्रंमंत्रमयंप्रोक्तं
माख्यातादेवतेतिच॥पूजनीयंप्रयत्नेनतेनेदंदेवतामयं॥नाग्निंचोरभयंतत्रतचराजभयंक्वचित्॥यत्रेदंलिखितंयं
त्रंपूज्यतेविधितःसदा॥अथरुद्रप्रयोगं॥देशकालौसंकीर्त्यअमुकफलाप्राप्तीयरमेश्वरप्रीत्यर्थंस्वयंब्राह्मणद्वा
रावामुकरुद्रजपंकरिष्यइतिसंकल्प्यतदंगतयागणपतिपूजनपुण्याहजनपुण्याहवाचनंनांदीश्राद्धाचार्यब्रह्मर्त्वि
श्वरणाभिकृत्वादेवालयादौजपंसमाप्यभद्रंकर्णेभिरितिमंडपंप्रविश्यकृतस्यामुकरुद्रजपस्यदशांशेनप्रति
मंत्रपक्षेणाष्टाचत्वारिंशत्पक्षेणवातिलद्रव्येणहोमंकरिष्यइतिसंकल्प्यगणेशंसंपूज्यसर्षपविकिरणादिमंडपप्र
तिष्ठांतंग्रहमखवत्कृत्वाग्निंप्रतिष्ठाप्यग्रहवेद्यांग्रहान्प्रतिष्ठाप्यरुद्रवेदिस्थवस्त्रलिखितरूपीठेदेवतास्थापयेत्॥ॐन

मोभगवतेरुद्रायतत्पुरुषविद्महेमहादेवायधीमहितन्नोरुद्रःप्रचोदयात्॥वामदेवःसद्योजातःवामदेवःअघोरःतत्पुरुषःईशानःततःपूर्वेहृदयेनेदीमहाकालःगणेश्वरः
हृदयमःमेगिरिशिःस्कंदःउमाचंडेश्वरःइतिप्रथमावरणं॥चक्षुषेनमःसूक्ष्मःशिवःएकपात्एकरुद्रःत्रिमूर्त्तिःश्रीक
ण्ठःवामदेवःज्येष्ठःश्रेष्ठःरुद्रःकालःकालविकरणःबलेबलविकरणःबलप्रमथनःइतिद्वितीयं॥अणि
मामहिमालघिमागरिमाप्राप्तिःप्राकाम्यःईशिताःवशिताब्राह्मीमाहेश्वरीकौमारीवैष्णवीवाराहीचामुंड
चंडिकाचसितांगभैरवःरुरुभैरवःचंडभैरक्रोधनेउन्मत्तभैःकालभैःभीषणभैःसंहारभैःइतितृतीयं॥
भवःशर्वःईशानःपशुपतिरुद्रउग्रःभीमाःमहान्चनेतःवासुकितक्षकःकुलीरःकर्कोटकःशंखपाल
कंबलःअश्वतरःधृतराष्ट्रःएलापत्रःशंखपालःमहापद्मःकुलिकःइतिचतुर्थं॥इंद्रःअग्निःयमःनिर्ऋतिःवरुणःवायुःकुबेरःईशान
ब्रह्मानंतःपृथिव्यादयःमस्तयःहेमकूटःगंधमादनं॥इतिचतुर्थं॥इंद्रःअग्निःयमःनिर्ऋतिःवरुणःवायुःकुबेरःईशान
शचीस्वाहावाराहीरवद्रुनीवारुणीवायवीकौबेरीईशानीवज्रंशक्तिरुद्रःखड्गःपाशःअंकुशःगदात्रि
शूलःऐरावतःमेषःमहिषःप्रेतःमकरःहरिणःनरःहयमःगोरावतःपुंडरीकःवामनःकुमुदःअंजनःपु

ष्पदंतःसार्वभौमःसुप्रतीकःइतिपंचमं॥पूर्वेरुद्रःआग्नेय्यामग्निर्विरूपाक्षश्चरक्षिणेयमःनैर्ऋत्यांनिर्ऋतिर्विश्वरूपश्च
पश्चिमेवरुणःवायव्योवायुःपशुपतिश्चोत्तरेकुबेरःईशान्यामीशानंतःऊर्ध्वेसिंगेचपूर्वोदिशेषंतस्कंअनंतवा
सुकिःशंखपालंमहायमःकंबलःकर्कोटकंतंतंतस्मैगृहोपदेशंदत्वावाह्यमंपूजयेत्तस्मात्यांकुंभेवरुणंसंपूज्यरुद्रंजपा
त्वेविप्रेवरुणयात्ततोयहमखंवदत॥ग्रहादिमोहोमंकृत्वाघृताकृतिंसेरुद्रहोमंकृत्वारुद्रपीठंदेवताभ्यएकैकामाज्याहुति
ंकृत्वादिक्पालादिभ्योरुद्रायशेषपात्राचग्रहमखंवह्निसंस्थाप्यपूर्णाहुतिंचसोदीरंचकृत्वापूर्णपात्रंविमोकादिकर्मशे
षंसमाप्याचार्यादिभोजनंहोमश्चेत्योग्रहीत्वाचार्यादिभोहस्तिणंदद्यात्॥ततश्चाचार्यादयोरुद्रंग्रहकलशंशेषंकेनयजमा
नस्याभिषेकंकुर्युः॥ततोयजमानोग्रहाणांरुद्रस्यचोत्तरपूजांकृत्वास्वशाखोक्तमंत्रेणविसर्ज्याचार्यंदत्वाग्निंसंपूज्यग
च्छगच्छेतिविसर्जयेदुपमाचार्यंयस्त्वाब्राह्मणानुमोदयित्वायस्मस्मृत्याप्रमादादितिजपित्वाकर्मसंपूर्णतांवाचयित्वाकर्मेश्व
रार्पणंकृत्वासुहृत्कृतोभुंजीतइतिरुद्रयज्ञविधिः॥अथरुद्राभिषेकविधिः॥हेमाद्रौमत्स्यपुराणेच॥यथातोरुद्रस्नानंतथाविधिः
वारुणाप्यामंशांतिगवतीर्थेस्नात्वोदंमुखःशुचिःप्रयतोब्रह्मचारीशुक्लवासास्तस्मिन्हस्तिनाप्रत्यग्रेशोतन्मुखःस्थित्वात्म

मिरेवतः स्थपयेत॥ प्रजनेनेन्द्रमितिरुद्रम्॥ पायोर्विसृष्टिरुद्रम्॥ हस्तयोर्हरस्तिरुद्रम्॥ वाकोरिंद्रस्तिरुद्रम्॥ जठरेऽग्नि॥
स्तिरुद्रम्॥ हृदयेशिरस्तिरुद्रम्॥ कंठेवसवस्तिरुद्रम्॥ वक्त्रेसरस्वतीतिरुद्रम्॥ नासिकयोर्वायुस्तिरुद्रम्॥ नयनयोः॥ सूर्यश्चंद्रम
सौतिरुद्रम्॥ कर्णकयोरश्विनौतिरुद्रम्॥ सलाटेरुद्रस्तिरुद्रम्॥ एष्टेपिनाकीतिरुद्रम्॥ पुरतः॥ शूलीतिरुद्रम्॥ पार्श्वयोः॥ शिव
शंकरौतिरुद्रम्॥ सर्वतोवायुस्तिरुद्रम्॥ ततोवहिः॥ सर्वतोग्निश्चासामासायरिरुतस्तिरुद्रम्॥ सर्वेषुसर्वेरुद्रम्॥
स्तिरुद्रम्॥ मोरसेनुः॥ अग्निर्वायुः॥ सूर्यश्चेंद्रमाः॥ नक्षत्राणि॥ आकाशंपृथिव्यौषधिवनस्पतयः॥ इंद्रः॥ पर्जन्यः॥ ईशानः॥ आत्मायुमेतत्॥ अग्नि
मेवाविशितरुतियथासिंधोर्मगानिसमुद्रायेनगंधपुष्पाक्षतधूपदीपैरात्मानंप्रत्याराधयेत॥ आराधितोमनुष्यै
स्तमिरेवैः सुरादिभिः॥ आवाहयामिमकान्तामागहाणमहेश्वरमेवंकंयजामहइत्यथैनमाराधयेत॥ आत्मावहं
नुहरयः सचेतसश्चैनरश्मिसाहकेतुमद्भिः॥ वातात्मनवैवेसवद्भिर्मोज्ञवीरायाहिशीघ्रममहत्यायरोदसीभित्यावाह्य रा॰ मा॰ ४५
स्थापितेत्यावाहनं॥ सद्योजातंप्रपद्यामीत्यावाहनं॥ रुद्रतिभवेभवेनातिभवेभजस्वमामितिपाद्यं॥ भवोद्भवायनमः
तिअघ्रिंगामिश्वस्तानं॥ अघ्रिंगाः॥ आपोहिष्ठात्याद्याः॥ अथार्घ्यंतर्पयति॥ भवंदेवंतर्पयामि॥ शर्वंदेवंतर्पयामि॥ ई

शानंदेवंतर्पयामि॥ पशुपतिंदेवंतर्पयामि॥ रुद्रंदेवंतर्पयामि॥ उग्रंदेवंतर्पयामि॥ भीमंदेवंतर्पयामि॥ महांतंदेवंत
र्पयामीति॥ तर्पयित्वात्येष्टायनमः॥ इत्याचमनीयं॥ श्रेष्ठायनमइतिमधुपर्कं॥ कलविकरणायनमइतिपाद्यं॥
॥ सर्वभूतदमनायनमः॥ इतिमपर्कं॥ कलविकरणायनमइतिपुष्पं॥ सर्वभूतदमनायनमइतिधूपः॥ मनोन्म
नायनमइतिदीपं॥ मनोन्मनायनमइतिकलेनैवेद्यं॥ अथाष्टभिर्मंत्रैरष्टपुष्पाणि॥ भवायदेवायनमः॥ सर्वायदे
वायनमः॥ ईशानायदेवायनमः॥ पशुपतेदेवायनमः॥ रुद्रायदेवायनमः॥ उग्रायदेवायनमः॥ भीमायदेवायनमः
॥ महादेवायनमः॥ अथास्याघोरनामरूपनिरूपते॥ अथैतस्यहिरण्यनमूर्द्धिकलशेतसंततधारंनिषिंचेत्॥ मधु
नासर्पिषापयसावेक्षुरसेननारिकेरोदकेनवाम्रसेनवातदलाभउदकेनवानमस्तेरुद्रमस्यवरत्येकाद्शानुवा
काभ्यानामवेजपेत्सर्वेषांपरेपुनराराधयेत॥ उत्तमाराधनेननरेतद्दिनमुक्तं॥ तेनाभिषिंचेनोदकेनाक्षीसामिस्प
नुवाकेनाघ्रिंगाभिश्चापादात्संमस्तात्पापक्षयार्थं व्याधिविमोचनार्थं जीवनार्थं श्रीकामःज्ञातिकामःपुष्टिकामस्तुष्टि
कामोमोक्षार्थं चकुर्यादेवंकुर्वन्नसिद्धिमवाप्नोति॥ शांतीर्योयइंद्रिणोरुद्राणांसवस्राःसुवर्णभूषितास्तेषभैकादश

शास्त्रदृष्टा भ एकांगां दद्यादित्याह। भगवान्बौधायनः यद्यप्यत्रैक एकं न्यास उक्तस्तथापि पूर्वोक्तन्यासपंचमपि कार्यं।
रुद्राणां जपहोमार्चनविधिं व्याख्यास्याम इत्युक्त्वा पंचन्यासोक्तेः। अर्चनमभिषेक इति महार्णवः। आत्मानं पत्नीति स्वशरीरे
मनसा पूजयेदित्यर्थः। आराधित इति मंत्रो मानसावाहने। गंधादौ नु त्र्यंबकमंत्रः यद्यपि मानसपूजायां नैवेद्यं तोक्तं तथापि
शिष्टाः कुर्वंति। संस्थापित इति बाह्यपूजायामात्वावहंत्वित्यावाह्य सद्योजातमिति पुनरावाहयेदित्यर्थः। अघोरतनूः
अघोरेभ्य इत्यादि सिद्धासि शिवोमित्यंता सर्वेषां पंचविधरुद्राणां उत्तमेनि अभिषेकोत्तरं बाह्यपूजैवेत्यर्थः। तदेत
दिति। यत्र रुद्राभिषेको विहितस्तत्रैव विधिरित्यर्थः। तेनेति। पापक्षयव्याधिविमोकाद्यर्थाभिषेकं संमार्जनमधिकं
कुर्यादित्यर्थः। त्र्यंबकमंत्रविधिस्तु कर्मविपाकसारे उक्तः। अथ पार्थिवपूजाविधिः। तिथितत्वे भविष्ये। मृद्भस्मगोशकृ
त्पिंडताम्रकांस्यमयं तथा। कृत्वा लिंगं सकृत्पूज्य वसेत्कल्पायुतं दिवि। वार्क्षं वित्तप्रदं लिंगं स्फाटिकं सर्वकामदं। मं
नर्मदागिरिजं श्रेष्ठमन्यद्वापेहि लिंगवत्॥ लिंगवत्लिंगाकारं। तेन नार्मदादेरपि लिंगानाकारस्य न पूज्यतेति तिथि
तत्वे॥ तत्रैवं नंदिपुराणे। आयुष्मान्बलवान्श्रीमान्धनवान्सुखी वरमिष्टं लभेल्लिंगपार्थिवं यः॥ समर्चयेत्॥ त

स्मात्तु पार्थिवं लिंगं ज्ञेयं सर्वार्थसाधकं। तत्रैव शिवधर्मे। वालुकानि च लिंगानि कारयेत्पार्थिवानि च। सहस्रपूजा ना
शोपि लभते वांछितं फलं तत्रैव कालकौमुद्यां। अक्षादल्पपरिमाणं न सिलिंगं कुत्र विन्नरः। कुर्वतांगुष्ठतो ह्रस्वं न कदाचि
त्समाचरेत्॥ अक्षोशीतिरक्तिकाः तेषोडशाक्ष इत्यमरात्। इदं च परिमाणं॥ प्रधानलिंगस्य न वेदिकायः। अंगुष्ठशब्दे
नांगुष्ठबृहत्पर्वग्रंथिरुच्यते। अंगुष्ठायांगुलिमानं तु यत्र यत्रोपदिश्यते॥ तत्र तत्र बृहत्पर्वग्रंथिभिर्मिनुयात्सदेति छंदो
गपरिशिष्टात्। अंगुष्ठमानमंगुलिमानं चेत्यर्थः। तत्रैव गौतमः॥ रात्रावुदङ्मुखं कुर्याद्देवकार्यं सदैव हि। शिवार्चनं स
दाप्येवं शुचिः कुर्यादुदङ्मुखः॥ सदा दिवा रात्रौ च। तत्रैव लिंगे। विना भस्मत्रिपुंड्रेण विना रुद्राक्षमालया पूजितो
पि महादेवो न स्यात्तस्य फलप्रदः॥ तस्मान्मृदापि कर्तव्यं ललाटे वै त्रिपुंड्रकं। ॐ हूं नम इति रुद्राक्षान्प्रत्येकम
भिमंत्र्य मालां धारयेदित्युक्तं तत्रैव। तत्पूजाधिकारार्थं पंचाक्षरजप उक्तस्तत्रैव भविष्ये। अपवित्रः पवित्रो
वा सर्वावस्थां गतोपि वा॥ महापातकयुक्तो वा मंत्रस्यास्य जपे यथा॥ अधिकारी भवेत्सर्व इति दत्वा जब्रवीच्छि
वः॥ इतिस्तथार्थो यथापदात्॥ तत्रैव ब्राह्मे॥ यावन्न दीयते चार्घं भास्कराय निवेदितं॥ तावन्न पूजयेद्विष्णुं शंकरं

शमहेश्वरः॥तत्रैवदेवीपुराणे॥महाहरणेसंघट्टप्रतिष्ठाकानमेवच॥स्नपनेपूजनेचैवविसर्जनेनमतःपरंहरो
महेश्वरश्चैवशूलपाणिःपिनाकधृक्॥पशुपतिश्शिवश्चैवमहादेवस्मृतः॥नाऊमेणापूर्वोक्तकर्मणिकार्य
णीत्यर्थः॥पूजनमध्येऽपिप्रतिष्ठाकानयोरुद्दिष्टार्थत्वात्पाऊकमणवंयद्यप्यत्रनामास्मैचविनियुक्तानि॥तथापि
ध्यात्वाप्रणवपूर्वेनुनत्रनामासमाहितः॥नमस्कारेणपुष्पादिविन्यसेच्चथकुर्यादितिसामान्यवाक्या
न्नमोंततोनेया॥पूजनेचयद्यपिशिवनमोंकमथापितघुक्तंपंचाक्षरोग्राह्यइत्युक्तं॥तत्रैवंनंदिपुराणे॥गो
मूहिरण्यवस्त्राश्विभिपुष्पनिवेदने॥ज्ञेयोनमःशिवायेतिमंत्रःसर्वार्थसाधकः॥पंचाक्षरस्यनमोंतत्वाभावात्सु
नंनमःशब्दोवाच्यइत्युक्तंतत्रैव॥तत्रानमःशब्दस्यनामर्थत्वात्पूर्वश्लिष्टनमःशब्दोनतन्निर्देशेविसर्जनात्पूर्ववा
मार्चनेनाष्टमूर्तिपूजोक्तातत्रैवमविष्यति॥शर्वायक्षितियेनमः॥भवायजलमूर्तयेनमः॥रुद्रायवह्निमूर्ते
येनमः॥उग्रायवायुमूर्तयेनमः॥भीमायाकाशमूर्तयेनमः॥पशुपतयेयजमानमूर्तयेनमः॥महादेवायसोममू
र्तयेनमः॥ईशानायसूर्यमूर्तयेनमः॥पूजाप्रकाशेऽरस्यैताःपूर्वोक्तक्रमयोगतः॥अथैषांप्रयोगास्तत्रैवोक्ताः

स्तिजेशिवंजपेन्नामतोवेद्यापूजाइत्यर्थः॥अथप्रसिद्धप्रागादियहणमित्युक्तं॥तत्रैवयुक्तंतुशूलपाणेरात्मेति॥अ
त्रशूद्रस्याप्यधिकारःशूद्रकर्मणियोनित्यंस्वायानिकुरुतेप्रिये॥तस्याहमर्चांगृह्णामिचेदरंवैविनूषिते॥नमोते
नशिवेनैवस्त्रीणांपूजाविधीयते॥स्वाहाप्रणवसंयुक्तंशूद्रेमंत्रेद्विजाःशूद्रोनिरयमाप्नोतिब्राह्मणाःशूद्रतमि
यात्॥तत्रैवस्कारात्॥एवंकारेणप्रणवनिरस्तिः॥अथप्रयोगः॥अमुककामःपार्थिवपूजांकरिष्यइतिसंकल्प्य
विभूतिरुद्राक्षधारणंकृत्वायथाशक्तिपंचाक्षरंजप्त्वापुष्पाद्यर्चायुनमर्घ्यंसूर्यायेदमर्घ्यंनममेतिस्वाहायनम
इतिमूलदरणं॥महेश्वरायनमइतिसंघट्टनंशूलायेनमइतिप्रतिष्ठापनं॥पिनाकधृषेनमइत्यावाहनं॥अथमू
र्तेरुक्तध्याने॥ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचंद्रावतंसंरत्नाकल्पोज्ज्वलांगंपरशुमृगवरा
भीतिहस्तंप्रसन्नं॥पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानं॥विश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रं॥मम
पेतिपाद्यार्घ्यंचमानीयानि॥पशुपतयेनमइतिस्नानं॥नमःशिवायेतिवस्त्रयज्ञोपवीतगंधाभरणपुष्पधूपदीपनै
वेद्यफलतांबूलदक्षिणाश्चत्वार्येद्यामष्टमूर्तिरसतादिनापूजयेत्॥शर्वायक्षितिमूर्तयेनमः॥प्राच्यां॥प्रभवायजलमू

र्त्तयेनमः॥ ईशान्यां॥ रुद्रयाग्निमूर्त्तयेनमः॥ उदीच्यां॥ उग्रायचायुमूर्त्तयेनमः॥ वायव्यां॥ भीमायाकाशमूर्त्तयेनमः॥ प्रती
च्यां॥ पशुपतयेयजमानमूर्त्तयेनमः नैर्ऋत्यां॥ महादेवायसोममूर्त्तयेनमः दक्षिणस्यां॥ ईशानायसूर्यमूर्त्तयेनमः॥ आ
ग्नेय्यां॥ महादेवक्षमस्वेति॥ संहारमुद्रयाविसर्जनं॥ अथशतचंडीविधिः॥ रुद्रयामले॥ शतचंडीविधानंचप्रोच्यमानंशृणु
ष्वतत्॥ सर्वोपद्रवनाशार्थंशतचंडीसमारभेत्॥ षोडशस्तंभसंयुक्तंमंडपंपल्लवोज्वलं॥ वसुकोणयुतांवेदींमध्येकुर्या
त्रिभागताः॥ पक्वेष्टकाचितांरम्यामुच्छ्रायेहस्तसंमितां॥ पंचवर्णरजोभिश्चकुर्यान्मंडलकंशुभं॥ पंचवर्णवितानंचकिं
किणीजालमंडितं॥ आचार्येणसमंविप्रान्वरयेद्दशसुव्रतान्॥ ईशान्यांस्थापयेत्कुंभंपूर्वोक्तविधिनाहरेः॥ वारुण्यां
चप्रकर्त्तव्यंकुंडलक्षणलक्षितं॥ मूर्त्तिदेव्याःप्रकुर्वीतसुवर्णस्यपलेनवै॥ तदर्धेनतदर्धेनतदर्धेनमहामते॥ अष्टादशभु
जांदेवींकुर्याद्वाष्टकरामपि॥ यदकूलपुराछत्रांवेदिमध्येनिधापयेत्॥ देवींसंपूज्यविधिवज्जपंकुर्युर्दशद्विजाः॥ शत
मादौशतंचांतेजपेन्मंत्रंनवार्णकं॥ चंडींसप्तशतींमध्येसंपुटोयमुदाहृतः॥ एकंद्वेत्रीणिचत्वारिजपेद्दिनचतुष्टयं॥ रूपा
णिक्रमशस्तद्वत्पूजनादिकमाचरेत्॥ पंचमेदिवसेप्रातर्होमंकुर्याद्विधानतः॥ गुडूचिंपायसंदूर्वातिलान्शुक्लान्यवान

पि॥ चंडीपाठस्यहोमंतुप्रतिश्लोकंदशांशतः॥ होमंकुर्याद्गुहादिभ्यःसमिदाज्यचरुक्रमात्॥ हुत्वापूर्णाहुतिंदद्यात्
विप्रेभ्योदक्षिणाक्रमात्॥ कपिलांगांनीलमणिंश्वेताश्वंछत्रचामरे॥ अभिषेकंततःकुर्युर्यजमानस्यऋत्विजः॥ ए
वंकृतेमरेशानसर्वसिद्धिप्रजायतेइति॥ अथसहस्रचंडीविधिः॥ तत्रैव॥ सहस्रचंडीविधिवच्छृणुविष्णोमहामते॥
राज्यभ्रंशेमस्मातेजनमारेमहाभये॥ गजमारेश्वरेवपरचक्रभयेतथा॥ इत्यादिविधेःदुःखेक्षयरोगादिजेभये॥ सह
स्रचंडिकापाठंकुर्याद्वाकारयेत्तथा॥ जापकास्तुशतंप्रोक्ताविंशद्वस्तश्चमंडपः॥ भोज्यासहस्रंविप्रेंद्रागोशतंदक्षिणां
दिशेत्॥ गुरवेद्विगुणंपकादेयंशय्यादानंतथैवचः॥ सप्तधान्यंचभूदानंश्वेताश्वंचमनोहरं॥ पंचनिष्कमितामूर्त्तिःकर्त्त
व्याव्यर्धमानतः॥ अष्टादशभुजोःदेवीसर्वायुधविभूषिता॥ अवारितान्नंदातव्यंसहस्रंप्रत्यहंविभो॥ शतंवातिनियताहा
रःपयःपानेनवर्त्तयेत्॥ एवंयश्चंडिकापाठंसहस्रंतुसमाचरेत्॥ तस्यस्यात्कार्यसिद्धिस्तुनात्रकार्याविचारणेति॥
एतद्वयंनानुष्ठेयं॥ यामलस्य॥ मोहतःशास्त्रत्वेनप्राण्यात्॥ तथाच॥ स्मार्त्तनिबंधे॥ कौर्मेदेवीवाक्यं॥ यानिशास्त्राणि
दृश्यंतेलोकेस्मिन्विविधानिच॥ श्रुतिस्मृतिविरुद्धानितेषांनिष्ठाहितामसी॥ कायालंभैरवंवापियामलंवाममव्रतं॥ ए

वेविधानिचानानिमोहनारव्यानियानिच॥मयासहान्येनेकानिमोहायेषांभवार्णवे॥तत्रैवपाद्मे॥चकारमोहशास्त्रा
णिकेशवोपिशिवेरितः॥आर्हतेयामलेचामपंचरात्रेतथाक्वचित्॥अथवैदिकदुर्गाराधनं॥शौनकः॥ज्ञातवेदसइत्येत
स्यऋक्सर्वार्थसाधने॥आयुरारोग्यसुखदंभूमिदंशत्रुनाशने॥यद्यद्वाछतिवाविप्रस्तत्तत्प्राप्नोत्यसंशयं॥सूक्तेनानेन
ननुकृयाच्छुक्लांबरधरःशुचिः॥जपेदयुतमेकाग्रंहविष्याशीजितेंद्रियः॥पशुपुत्रधनार्थंचप्रत्येकंलक्षमभ्यसेत्त
॥सर्वेषामेवदेशानांविशिष्टरेवतालयं॥तस्माद्देवालयेकुर्वन्विशिष्टफलमश्नुते॥ततःप्राचीप्रशस्तादिगाश्रय
वविशोषतः॥प्रतीचीवायवीयावत्रैधासौम्याचदिनारुद्रफल्गुन्यांमिचारेचविजयेपिविशिष्यते॥कुंडेवा
स्थंडिलेवापिहोमंकुर्यात्तदुदितः॥सचुरस्रभवेत्कुंडमरत्नाद्रयसयुतं॥स्थंडिलाद्यन्यभागेतुयज्ञतत्रैवकल्पयेत्त
॥महाद्विजःशुचिर्नित्यंसर्वभूतहितेरतः॥दुर्गामावाहयेत्कुंभेसायुधांसमहाभुजां॥नीलोत्पलदलश्यामांकिरीटांद्वि रा॰
र्विभूषितां॥ततस्त्वाराधतोस्यैवंनस्मिंस्तीर्थेस्कान्विते॥अवाहनेनकिंविद्यासमिद्भिरथकुंडकं॥मंत्रेणानेनशुद्ध ध॰
यास्थंडलंरत्नाक्षतैः॥ततःस्विष्टकृतंचैवहोमशेषंसमापयेत्॥उत्थाप्यथजपेन्मंत्रंतत्रसमन्वितं॥यश्चदु

र्गाचवरइत्यस्यसाद्यापवेति॥इतिदुर्गाकल्पः॥शौनकः॥अथवास्यामिसर्पस्यसंस्कारविधिमुत्तमं॥सिनीवालीपूर्ण
मास्यांपंचम्यांकारयेच्चते॥कृतसर्पविधोविप्रःपूर्वजन्मनिवार्यहि॥स्नात्वागत्यततोब्रह्मन्द्वंद्वंद्याद्विजायते॥वध्य
प्रस्थापयेत्पापीचरेत्कृच्छ्रंत्रयंनुद्देश॥वधेहजन्मनिकृतेलोहद्वंद्विज्ञातये॥द्यात्यापविशुध्यर्थंशेषियायकुरु
चिते॥विप्रायदद्यान्मूल्यंवस्त्रनावेसतिप्रयत्नतः॥साक्षाद्वधेकर्मकर्तुमेतद्वैप्रशापयेत्॥निष्कद्वयंनिष्कमेकंनि
ष्कमेककनीयसः॥अनुमत्याद्विकर्तृणांनिष्क्रमर्धंतदर्धकं॥विप्रस्याष्ठनकुर्वंतद्यादिज्ञानुसारतः॥अनुज्ञांवापु
रोलेख्यासंस्कुर्यान्नदनंतरं॥प्रियंगुन्नीहिगोधूमतिलपिष्टेनवाथवा॥कृत्वासर्पाकृतिंतेनसर्पभोगसमन्वि
तं॥अनेनवस्त्रमाणेनप्रार्थयेद्विप्रमेत्यहि॥एहिपूर्वंमतःसर्पअस्मिन्पिष्टेसमाविश॥संस्कारार्थंमहंभ
वाप्रार्थयामिसमाहितः॥वस्त्रोपवीतगंधाद्यैरलंकृतैःकुसुमादिभिः॥कर्तापुष्पांजलिंदत्वाप्रणिपत्यहरेद्व
हि॥प्रक्षालितांघ्रिपाणिस्तुस्वाचम्योपविशेद्भुवि॥कुर्यात्संस्कारसंकल्पप्राणायामपुरःसरं॥यज्ञोपवीतानिक
र्मसर्पसंस्कारकर्मसु॥लौकिकाग्निप्रतिष्ठाप्यसमिद्याधानमाचरेत्॥ततोयेरग्निरित्यागेनभूमिसंप्रोक्ष्यवारिभिः

॥चितिं कृत्वाथ संस्तीर्य कुशैराग्नेयकाग्रकैः॥ पर्यक्ष्याग्निं परिस्तीर्य परिषिच्य समर्पयेत्॥ कृत्वेध्माधानपर्यंतं सत्पात्रा
सादनादिकं॥ आधारचक्षुषी कृत्वा सर्पिषा तु यथाविधि॥ सर्पं गृहीत्वा यत्नेन चितिमारोपयेत्सुधीः॥ अपः सृष्ट्वा स्पृशे
च्छ्रोत्रं गत्वा चाग्निसमीपतः॥ स्रुवेण जुहुयादाज्यमग्नौ व्याहृतिभिस्त्रिभिः॥ सर्पस्य जुहुयादाज्यं व्याहृत्या च समग्रया॥ आ
ज्यशेषं स्रुवेणैव सर्पदेहे निषेचयेत्॥ वमसस्थैर्जलैः सर्पं व्याहृत्याभ्युक्ष्य पाणिना॥ अग्रे रक्षाणेत्यनया सर्पायाग्निं प्र
दापयेत्॥ उपतिष्ठेद्दह्यमानं नमोस्तु सर्प्पमंत्रतः॥ जानतो ज्ञानतो वापि कृतः सर्पविधो मया॥ पूर्वजन्मनि वा सर्पतत्स
र्वं क्षमयस्व मे॥ इति संप्रार्थ्य नागेंद्रं स्नात्वागत्य ततः पुनः॥ क्षीराज्येन ततश्चाग्निं प्रोक्ष्य व्याहृतितिसृभिः॥ हुते सर्पे ज
लेनाग्निमभिषिंचेत्ततः परं॥ नास्थिसंचयनं कुर्यात्स्नात्वा चम्पगृहं व्रजेत्॥ ब्रह्मचर्यादिकं कार्यं त्रिरात्राच्छुचिरिष्यते
॥ चतुर्थेहनि संप्राप्ते सचैलं स्नानमाचरेत्॥ घृतपायसभक्तैस्तु द्विजानष्टौ नु भोजयेत्॥ कर्त्तानामपदैर्विप्रानर्चयेद्व
क्ष्यमाणकैः॥ सर्पोनंतस्तथा शेषः कपिलो नाग एव च॥ कालियश्चैव पाशश्च भूधरश्च प्रकीर्त्तितः॥ पादप्रक्षालनं कुय
दिभिर्नामपदैः पृथक्॥ गंधपुष्पक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान्॥ एवं कृते विधाने वै सर्पसंस्कारकर्मणि॥ सर्पहिंसाकृ

तो न्यायो मुच्यते नात्र संशयः॥ कुष्ठव्याधिसमायुक्तं सर्वदा भेषजं त्विदं॥ आयुरारोग्यमैश्वर्यं प्राप्य कामानवाप्नुयात्
॥ अथवास्तु शांतिः॥ मात्स्ये॥ वैत्रव्याधिमवाधिमवाप्नोति यो गृहं कारयेन्नृपे॥ वैशाखे धेनुरत्नानि ज्येष्ठे मृत्युस्तथै
व च॥ आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात्॥ श्रावणे भृत्यलाभं च हानिं भाद्रपदे तथा॥ पत्नीनाशोश्विने विद्या
त्कार्त्तिके धन-न्यकं॥ मार्गशीर्षे तथा भक्ते पौषे तस्करतो भयं॥ लाभं च बहुशो विद्यादग्निमासं विनिर्दिशेत्॥ का
त्वुने कांचनं पुत्रानिति कालबलं स्मृतं॥ अश्विनी रोहिणी मृ उत्तरात्रमैंदवं॥ स्वातिहस्तानुराधावगृहारंभे प्रश
स्यते॥ आदित्यसोमवर्जं तु सर्वे वाराः शुभावहा॥ वज्रव्याघातशूलेषु व्यतीपातातिगंडयोः॥ विष्कंभगंडपरिघव
ज्रयोगेन कारयेत्॥ तेमैत्रेथमाहेंद्रे गंधर्वाभिजित्रोहणे॥ तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत्॥ चंद्रादित्य
बलं लब्ध्वा लग्नेशु निरीक्षिते॥ स्तंभोच्छ्रायादिकर्त्तव्यमन्यत्तु परिवर्जयेत्॥ प्रसादेष्वेवमेव स्यात्कूपवापीषु चैव हि
॥ पूर्वं भूमिं परक्षितपश्चात्द्वारं प्रकल्पयेत्॥ श्वेतारक्ता तथा पीता क्षत्रियस्य तु॥ काषायकटुकस्तद्वद्वैश्यः शूद्रेषु शस्य
ते॥ अरत्निमात्रे वै गर्त्ते स्वनुलिप्ते च सर्वतः॥ घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयं॥ ज्वालयेद्भूपरिक्षार्थं पूर्णं तत्सर्वं

दिङ्मुखं॥ दीसौ पूर्वादिगृह्णीया — वर्णानामनुपूर्वशः॥ वास्तुः सामूहिको नाम दीप्यते सर्वतस्तु सः॥ शुभदः सर्व
वर्णानां प्रसादेषु गृहेषु च॥ अरत्निमात्रं गर्त्तं नु परीक्ष्य स्वातपूरणे॥ अधिके श्रियमाप्नोति न्यूने हानिः समे समं॥ काल
कृष्टेथवा देशे सर्वबीजा — वापयेत्॥ त्रिपंचसप्तरात्रेण यत्र रोहंति तान्यपि॥ ज्येष्ठोत्तमकनिष्ठा भूर्वर्जनीयेतराम
ता॥ पंचगव्यौषधिजलैः परिक्षित्वा च सेवयेत्॥ दानहेमाद्रौ मात्स्ये॥ एकाशीतिपदं कृत्वा रेणुभिः कनकेन तु॥ पश्चा
त्पिष्टेन तु॥ पश्चाल्लिंपेत्सूत्रेणालोड्य सर्वतः॥ दश पूर्वायतारेरवा दश चैवोत्तरायताः॥ सर्ववास्तुविभागेषु वि
ज्ञेया नवका नव॥ यदस्थान्पूजयेद्देवान्शान्त्यै च दशैव तु॥ द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश॥ मध्ये न
व पदस्त्वेकश्चत्वारस्त्रिपदाः स्मृताः॥ विंशतिस्त्वेकपदिकास्ताः चैतो द्विपदाः स्मृताः॥ नामतस्तान्प्रवक्ष्यामि स्थानानि
च निबोधत॥ ईशानकोणादिसुरान्पूजयेत्क्रमशो न च॥ शिखी चैवार्थपर्जन्यो जयंतः कुलिशायुधः॥ सूर्यस
त्यौ भृशश्चैव आकाशो वायुरेव च॥ पूषा च वितथश्चैव गृहक्षतयमावुभौ॥ गंधर्वो भृंगराजश्च मृगः पितृगणस्तथा॥
दौवारिकोथ सुग्रीवः पुष्पदंतो जलाधिपः॥ असुरः शेषपायौ च रोगो हि मुख्य एव च॥ भल्लाटः सोमसर्पौ च अदिति

श्च दितिस्तथा॥ बहिर्धीर्द्वात्रिंशदेते तु तदंतः चतुरः शृणु॥ ईशानादिचतुःकोणसंस्थितान्पूजयेद्बुधः॥ आपश्चै
वाथ सावित्रो जयो रुद्रस्तथैव च॥ मध्ये नव पदो ब्रह्मा तस्य चाष्टौ समीपगाः॥ अर्यमा सविता चैव विवस्वान्वि
बुधाधिपः॥ मित्रोथ राजयक्ष्मा च तथा पृथ्वीधरः स्मृतः॥ अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृताः॥ आपश्चैव
पवत्सश्च पर्जन्योग्निर्दितिस्तथा॥ यदिकानां तु वर्गोयमेवं कोणेष्वशेषतः॥ तन्मध्ये तु बहिर्विंशद्द्विपदास्ते तु स
र्वतः॥ अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा॥ ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्वतः॥ मूर्धन्यग्निः समादि
ष्टो मुखे वापः समाश्रितः॥ पृथ्वीधरोर्यमा चैव स्तनस्थानमधिष्ठितौ॥ वक्षस्थलं वाथ वत्सः पूजनीयः सदा बुधै
ः॥ नेत्रयोर्दितिपर्जन्यौ श्रोत्रे दितिजयंतकौ सर्पेंद्रौ चंद्रसंस्थौ तु पूजनीयौ प्रयत्नतः॥ सत्यरोगादयस्तद्वद्बाह्वोः
पंच च पंच च॥ भृशश्च राजयक्ष्मा च वामहस्ते समास्थिता॥ सावितातद्वद्वस्तं दक्षिणमाश्रितौ॥ विवस्वानथ मि
त्रश्च जठरे संव्यवस्थितौ॥ पूषा च पाययक्ष्मा च हस्तयोर्मणिबंधने॥ तथैवासुरशोषौ च वामपार्श्वे समास्थितौ॥ पा
र्श्वे तु दक्षिणे तद्वद्वितथाः सगृहक्षतः॥ ऊर्वोर्यमा बुधौ ज्ञेयौ तत्वो गंधर्वपुष्पकौ॥ जंघयोर्भृशसुग्रीवौ स्फिक्स्थौ

दौवारिको मृगः॥ जपशकौ तथा मेढ्रे पादयोः पितरस्तथा॥ मध्ये नवपदो ब्रह्मा हृदये सनुपूज्यते॥ चतुःषष्टिप
दो वास्तुः प्रसादे ब्रह्मणा स्मृतः॥ ब्रह्मा चतुष्पदस्तत्र कोणे ह्येकपदास्तथा॥ बहिः कोणे तु चाष्टौ तु सार्द्धशो
भयसंस्थिताः॥ विंशतिद्विपदाश्चैव चतुःषष्टिपदे स्मृताः॥ होमस्त्रिमेखले कार्यः कुंडे हस्तप्रमाणके॥
यवैः कृष्णतिलैश्चैव समिद्भिः क्षीरवृक्षजैः॥ पालाशैः खादिरैश्चैव पामार्गोदुंबरसंभवैः॥ कुशदूर्वाभवैर्वापि
मधुसर्पिःसमन्वितैः॥ कार्यस्तु पंचनिर्बीजैर्बिल्वबीजैरथापि वा॥ होमांते भक्ष्यभोज्यैस्तु सर्वदेशे बलिं हरेत्॥
तद्वद्विशेषनैवेद्यमिदं दद्यात्क्रमेण तु॥ ईशकोणे घृताक्तान्नं शिखिने विनिवेदयेत्॥ ओदनं सोत्पलं दद्यात्प
र्जन्याय घृतान्वितं॥ जयंताय ध्वजं पीठं पैष्टं कूर्मं च सत्यते॥ इंद्राय पंचरत्नानि पैष्टं च कुलिशं तथा॥ वितान
कं च सूर्याय पूपं सक्तुं तथैव च॥ सत्याय सघृतं गोधूममत्स्यान्दद्याद्भृशाय च॥ शष्कुलीश्चांतरिक्षाय द
द्यात्सक्तूंश्चावायवे॥ लाजाः पूष्णे तु दातव्या वितथे च णकोदनं॥ गृहक्षताय मध्वन्नं यमाय पिशितोदनं॥ गं
धोदनं च गंधर्वे भंगे मेषघ्नं जिह्वकं॥ मृगाय यावकं दद्यात्पितृभ्यः कृसरं तथा॥ दौवारिके दंतकाष्ठं पैष्टं गृहब

लिं तथा॥ सुग्रीवे पूपकान्दद्यात्पुष्पदंताय पायसं॥ कुशस्तंबेन संयुक्तं तथा पद्मं च वारुणे॥ पिष्टं हिरण्मयं द
द्यात्सुरामना॥ घृतोदनं च शोषाय गोधावै पापयक्ष्मणे॥ घृतलड्डुकानुरोगाय नागे पुष्पफलान्वितं॥ भक्ष्यमु
ख्याय दातव्यमुद्गोदनमतः परं॥ भल्लाटस्थानके दद्यात्सोमाय मधुपायसं॥ नागाय शालिजं पिष्टमदित्यै पोलि
का तथा॥ दितेस्तु पूरिकां दद्यादित्यंबवाह्यतो बलिः॥ क्षीरमापाय दातव्यमापवत्साय वै दधि॥ सवित्रे लड्डुकान्द
द्यात्समरीचं कुशोदकं॥ सवित्रे गुडपूपांश्च जपाय घृतचंदनं॥ विवस्वते पुनर्दद्यादिक्षुचंदनपायसं॥ हरितालोदनं
दद्यादिंद्राय घृतसंयुतं॥ गुडोदनं तु मित्राय रुद्राय घृतपायसं॥ आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मणे॥ पृथ्वी
धराय मांसानि कूष्मांडानि च दापयेत्॥ शर्करापायसं दद्यादर्पणोपानमेव च॥ पंचगव्यं यवांश्चैव तिलाक्षतहविश्च
रुं॥ भक्ष्यं भोज्यं च विविधं ब्रह्मणे विनिवेदयेत्॥ एवं वै पूजिता देवाः शांतिं कुर्वंति ते सदा॥ सर्वेषां कांचनं दद्यात्ब्रह्मणे
गां पयस्विनीं॥ राक्षसीनां बलिर्देयो मांसौदनसमन्वितः॥ मांसौदनं घृतप्रकेसरं हविषान्विताः॥ ईशानभागमा
श्रित्य चरक्यै विनिवेदयेत्॥ मांसौदनं रुधिरं हरिद्रौदनमेव च॥ आग्नेयीदिशमाश्रित्य विदार्यै विनिवेदयेत्॥ द

ओदनंमरुधिरंमत्स्यरवैश्चयुतं॥पीतरक्तवलिंदद्यात्तृप्तनामोचराक्षसी॥वायव्येपापराक्षस्यैमन्मेमांसमु
रामवे॥यायसंवापिदानव्यंस्नानान्नामसंवेतःकमात्॥नमस्कारानुयुक्तेनप्रणवेनसवेन॥ततःसर्वौषधिःस्ना
नंयज्ञमानस्यकारयेत्॥श्रियंलोकेजयेद्यज्ञमायेचाम्येगृहमागता॥एतद्वास्तुपशमनंकृत्वाकर्मसमाचरेत॥
प्रासादपरिवर्त्तनेऽपुरवेश्मप्रवेशेचसर्वेषशांतये॥नवेनोद्यानेशरभेपरिवर्त्तने॥जीर्णोद्धारेतथोत्थानेतथा
गृहनिवेशने॥द्वारनिवर्त्तनेतद्वत्प्रासादपरिवर्त्तने॥पुरवेश्मप्रवेशेचसर्वेषशांतये॥वास्तूपशमनंकृत्व
ततःसूत्रेणवेष्टयेत्॥गंधोदकपावमानेनमंत्रेणनवनाडिकं॥नत्यंगंधसवाद्यंचकुर्योद्ब्राह्मणवाचनं॥अने
नविधिनायस्तुप्तानिसंवत्सरंबधः॥गृहंवायतनंकुर्योन्नमनुष्यमवाप्नुयात्॥गंधोदकहोमविधिनाबलिय
र्मकुर्यात्प्रासादवास्तूपशमनेचविधिर्यउक्तः॥अत्रपोराणवास्तुशांतेस्वस्वगृहोक्तवास्तुशांतासमुच्चयो
विधीयते॥संतर्पयेद्विजवरानथमस्मोज्यैःसुरोत्तमैः॥कृत्वायनोद्विजवरानथशूणकु
मेध्यस्थानमरत्नपुष्पफलोपशोभं॥दत्वाछत्रमन्नबलिभोजनं॥गृहंनप्रविशेद्धीहिरण्यवसनानितथाद्भिमो

णांशस्यशांतिनिलयंसगृहंविशेच्च॥नारदसंहितायां॥अकपाटमानाछन्नमन्नबलिभोजनं॥गृहनप्रविशेद्धीमा
नापशमकरोहितन॥वसिष्ठः॥कृत्वाशुक्लेशुभेवामतोवाविप्रान्पूज्यानयतःपूर्णकुंभैर्मंत्रैरणस्थितेस्व
स्तिःस्वस्तीतिवाद्यैर्विशेच्च॥नारदसंहितायां॥मत्तेटिकास्वर्णरत्नधान्यगोवत्समंयुता॥गृहमध्येहस्तमात्रगर्त्तेन्यासाय
विन्यसेत्॥वसिष्ठसंहितायां॥निर्माणेमंदिराणांचप्रवेशेत्रिविधेपिवा॥वास्तूपशांतिकर्त्तव्यातस्मात्तांकथयाम्यतः॥
गृहमध्येहस्तमात्रेसमंतान्नेदुलोपरि॥एकाशीतिपदंकार्यंतिपदंकार्यंतैस्तस्यसुशोभन॥एकद्वित्रिपदाःएकद्वित्रि
पंचचत्वारिंशत्सुरार्चिताः॥द्वात्रिंशद्बाह्यतोवस्त्रमाणाश्चांतस्थयोदश॥तेषांस्थानानिनामानिवक्ष्यामिश्वरकोणतः॥
तत्राग्निरंशुकोणस्यस्त्वसौचैकपदेश्वरः॥तस्माद्द्वितीयःपर्जन्यश्चासौचैकपदेश्वरः॥जयंतेद्रकेसत्यास्वभृंगादिप
देश्वराः॥शक्रांशवायुपरेतेकमाद्येकपदेकेश्वराः॥एवंप्राच्यानवज्ञात्वात्वेवमेवामहिस्रच॥आद्यावेत्यावेकपदेद्विप
दाःपंचमध्गाः॥पूषाद्यष्टौयमांतासुरमुख्यामनागगाः॥आद्यौचांत्यावेकपदेद्विपदाःपंचमध्गाः॥एतौपि
नृगणाधीशाःपापांतःपश्चिमेसुराः॥आद्यंतौद्वावेकपदेद्विपदाःपंचमध्गाः॥रोगाद्यरित्यंतसुराःससौम्यदि

मिक्रमात्॥तत्राथस्थचतुष्केशेषीशादिपुनक्रमात्॥आपःसावित्रविजयरुद्रश्चैकपदेश्वराः॥मध्येनवपरोब्रह्मात
मेशानादिकोणगाः॥आपवश्चोथवसवितावित्रुधाधिपमन्त्रिकः॥राजयक्ष्माचचत्वारःसुरश्चैकपदेश्वराः॥ब्रह्म
णःपूर्वतोदिक्षुविपराश्चामरेश्वराः॥अर्यमाचविवस्वांश्चमित्रःपृथ्वीधरःक्रमात्॥स्वस्वस्थानेषुदेवतास्थापिते
षीहोमवेत्॥कोणेषुपंचपंचैवचतुर्थेकपदाःसुराः॥शेषादिदिक्षुद्विपदाःपंचपंचयथाक्रमं॥ब्रह्मणःपूर्व
तोवायुःपूषाचवितथस्तथा॥गृहक्षतःपितृयतिर्गंधर्वोनगराजकः॥मृगःपितृगणाधीशास्तथाहोवारिकादयः॥
सुग्रीवःपुष्पदंतश्चजलाधीशोनिशाचरः॥शोषःपापश्चरोगोहिमुख्योमध्यारगवच॥सोममोर्पोदित्यदितीवांवि
ग्रहमरास्मताः॥आपश्चैवायत्सश्चजयोरग्नेग्रस्तेथवच॥मेध्यनवपरोब्रह्मातस्थानस्यसमीपगाः॥शेषाघता
नरितोहवार्पितोब्रह्मणःस्मताः॥अर्योमासविताचैवविवस्वान्विबुधाधिपः॥मित्रोथराजयक्ष्माचतथापृ
थ्वीधरःक्रमात्॥आपवत्सोष्टमःपंचचत्वारिंशत्सुरोत्तमाः॥ज्ञात्वैवंस्थानमानिब्रह्मणाप्रतंहितान्यमेतत्॥वा
स्तुनोवास्तुमंत्रेणगंधपुष्पासनादिभिः॥आदिपदेनइर्वारि॥वास्तुमंत्रेणवास्तुनोइर्वादध्यक्षतादिभिरिति

नारदसंहितोक्तेः॥प्रणवेनार्चयेद्यापिअथवास्वस्वनामभिः॥शुक्लवस्त्रयुगंदद्याद्धूपदीपफलैःसह॥अपूपैर्घृ
तसूपिवनैवेद्यैर्वाघैःसहसमर्पयेत्॥तांबूलंचततोदद्यादेवस्यैवपृथक्पृथक्॥स्तवपुष्पांजलिंकृत्वाप्रार्थयेद्यास्तु
रुषे॥वास्तुपुरुषनमस्तेस्तुभूशय्याभिरप्रभोमद्गृहंधनधान्यादिसमृद्धंकुरुसर्वदा॥इतिप्रार्थ्यततोस्वाद्दक्षिणाम
र्चकायच॥विप्रान्भोजनंदत्वास्वयंभुंजीतबंधुभिः॥एवंयःकुरुतेसम्यक्पूजास्तुप्रयत्नतः॥आरोग्यपुत्र
पौत्रादिधनधान्यसमेनरः॥वास्तुपूजामकृत्वायःप्रविशेन्नचमंदिरं॥रोगान्नानाविधानक्लेशान्प्राप्नुयतेमवे
मंकरान्॥बौधायनः॥अथातोगृहशांतिकर्मगृहवृद्धिमिछतामासिमासिस्तानौमवस्रेरुद्यमाणपर्वे
पुण्येनक्षत्रेगृहशांतिं॥मानस्तोकइतिपंचगवेनरर्षेमुष्टिनासप्तोक्षतियरुद्रमयामहेस्वस्तिदाविशास्पतिरिति
दशमोरुगुंबपाजःप्रमितिनएर्ध्वमित्येतानानुवाकेनसिद्धार्थान्प्रकीर्यवास्तुमध्येथरुद्रयजनोस्तोरुद्रन
मस्याग्निमुखान्कृत्वापंचाज्याहुतीर्हुत्वास्तोष्यन्नरुद्रशमामथाज्याकृतीरुपजुहोतिवास्तोष्पतेध्रुवास्थूणा
तिषड्भिरनुवाकैरसमाविग्रामहस्वजुकुर्यात्सिद्धमाधेनुवरप्रदानाब्राह्मणानत्रेनपरिविष्य

पुण्याहं स्वस्तिऋद्धिमितिवाचयित्वेषपुत्रानस्यबहवःपुत्रभवंतिवाद्याःप्रहीयंतेवाद्याःप्रहीयंतेमहाव्याधयश्च
तनक्षतिनदृष्टिर्णानतस्करसर्पराक्षसभयंनवाधतेतदितिहस्माहबोधायने॥नारदसंहितायां॥स्नानागारंदक्षिण
प्राच्यामाग्नेय्यांपावकालयः॥याम्ययांशयनंगेहेनैरृत्यांशस्त्रमंदिरं॥प्रतीच्यांभोजनगृहंवायव्यांपशुमंदिरं॥नो
दारंतूत्तरस्यामीशान्यांचैवमंदिरं॥वसिष्ठसंहितायां॥स्वगृहात्पश्चिमेभागेपितृस्थायहमंदिरं॥गृहपार्श्वय
हस्तेभ्यःसमाःकार्यास्त्रयःसमाः॥नात्युच्छ्रितेनातिनीचेकुड्येसंधयेरुचिं॥द्वारप्रमितिःपंक्तेष्टकाभिर्वोन्न
रुणाप्यथवामरुत्॥कार्योविचित्रयत्नेवोपिहरणोऽथनक्षत्रि॥गर्गः॥द्वारंप्रयत्नात्कर्तव्यंसर्वद्वारप्रतिष्ठि
तं॥परकोणं॥परद्वारंपरस्तंभंपरदुःखं॥कूपंस्नानंहिमंश्वेवहंतद्वारंनिरर्थकंराजतोभयमत्युश्चैरतिनी
चैश्चैवस्करंचरतः॥विनाशंप्रातिविस्तारंगमनंचातिचक्रुधः॥तिप्रमाणंद्वारिद्र्यंमत्स्येव्याधितोभयं॥नि
ष्फलत्वंविनष्टपतिकुटिलेरुणवद्भवेत्॥कुक्षिरोगःस्यातसद्भयंकुक्षिपीडिनेकूपस्थाने॥वसिष्ठसंहितायां॥ गम॰ ५५
गृह्यंपुत्रहानिश्चस्त्रीनाशोनिधनंनवेत्समपृष्ठचुभयसौख्यंपुष्टिःप्राणस्थितिःक्रमात्॥कूपंकृतेमध्यमबुधः

नहानिश्चवास्करः॥तस्मात्संपश्यिचार्यायकूपंकुर्याच्चबुद्धिमान्॥तत्रैवयुक्तागोशकृत्सकरामीवकुसंचय
कां॥हरिद्रामीषिपंसीद्रंसापिचुमंदजपामरं॥बंधूकयुगपत्सारमरंजगृहमल्लिकाः॥मल्लिकापारसीजाती
नारिकेलास्त्रणंउमाः॥एतेगृहागणेवृक्षाःसर्वेशमगजप्रदाः॥पूसकर्कंधुरक्षौद्रोगृहस्योन्नतःशुभः॥मशैधोदु
वरश्चत्थाःप्लाक्षिण्युंबरप्रदाः॥अगस्तिमालुसिगारुग्रहरिद्राकदलीकदयः॥गम्पयप्रजाताश्चैतेदुःखशोकभं
यप्रदाः॥अथपिहरुतोमास्मालुसारिवास्तुशांतिप्रयोगः॥गृहप्रवेशेपूर्वेद्भिगृहारंभासौख्यंयजमानोदेशकार्यो
स्मत्वास्ववास्तोःशुभतासिध्यर्थंमनवयहमस्वावास्तुशांतिंकरिष्यइतिसंकल्पतद्रात्रेनगरोशपूजा पुण्याहवाच
नमातृकापूजननांदिश्राद्धंचार्यंतिश्वरणानिकुर्यात्॥कृत्विजश्चत्वारः॥ततश्चाचार्योयत्रसंस्थितमितिमंत्रामा॥सू
तपेतपिशाचाघाश्चयक्षकामनुरासमाः॥स्थानात्स्मात्प्रजंत्वस्मत्संकरोमिभुवंतिमां॥मिति॥चसर्वपान्विकीर्यपंचगव्ये
नसर्वगृहंप्रोक्ष्यहस्तमितंकुंडंखंडिलंवाकृत्वातत्सूर्वस्तरीणामाचहस्तमितंवेदीद्वयंकृत्वाईशानंवेदरीशानंवि
कोणंपु॥विशानुभूतलेनागलोकपालाश्चमर्वतः॥अस्मिन्गृहेवतिष्ठंतुआयुर्बलकराःसदा॥तिशंकूत्रोपयेत

प्रासादादौ गृहपदस्थो नेतन्निर्देशः॥ ततः शंकुपार्श्वे ईशानादि॥ अग्निभ्योप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः॥ तेभ्यो ब
लिं प्रयच्छामि पुण्यमोदनमुत्तमम्॥ मिति॥ माषभक्तबलीन्दत्वा वेयुः परिवस्त्रे कुंकुमादिना सुवर्णरजतादिशला
कयाशांतायै नमः॥ यशोवत्यै कांतायै विशालायै नमः॥ प्राणदाहिन्यै सत्यै समुत्यै नंदायै सुभद्रायै सुरथायै एतै
र्नामभिर्यश्चादारंभाः प्रागंतागंडदक्संस्था अंगुलद्वयांतरालादशरेखाः हिरण्यायै नमः॥ सुव्रतायै नमः॥ लक्ष्म्यै न
मः विभूत्यै नमः॥ विमलायै नमः॥ प्रियायै नमः॥ तपायै नमः॥ ज्वालायै नमः॥ विशोकायै नमः॥ इडायै नमः॥ ए
ते दक्षिणारंभा उदशांता प्राक्संस्था दशरेखाः॥ कृत्वा कुंडे स्थंडिले वाग्निं प्रतिष्ठाप्य दक्षिणवेद्यां सांगग्रहान्संस्था
प्य तदीशान्यां कलशं॥ च संस्थाप्य वास्तुमंडले प्रतिमादौ देवता आवाहयेत्॥ ईशानकोणपदे वास्तोः शि
रसि शिखिने नमः॥ शिखिनमावाहयामि॥ तद्दक्षिणैकपदे दक्षिणनेत्रे पर्जन्यं॥ तद्दक्षिणपदे तत्पश्चिमपदे
च दक्षिणश्रोत्रे जयंतं॥ तद्दक्षिणपदद्वये दक्षिणांसे कुलिशायुधं॥ तद्दक्षिणपदद्वये दक्षिणबाहौ सूर्यं॥ तद्द
क्षिणपदद्वये दक्षिणबाहावेव सत्यं॥ तद्दक्षिणपदद्वये दक्षिणकूर्परे भृशं॥ तद्दक्षिणोपरिस्थितैकपदे दक्षिण

प्रवाहावाकाशं॥ तद्दक्षिणाग्नेयकोणपदे दक्षिणप्रवाहावेव वायुं॥ तत्पश्चिमैकपदे दक्षिणमणिबंधे पूषाणं॥ त
त्पश्चिमपदे तदुत्तरपदे च दक्षिणपार्श्वे वितथं॥ तत्पश्चिमपदद्वये दक्षिण एव ग्रहक्षजं॥ तत्पश्चिमपदद्वये दक्षिणो
रौ यमं॥ तत्पश्चिमपदद्वये दक्षिणजानौ गंधर्वं॥ तत्पश्चिमपदद्वये दक्षिणजंघायां भृंगराजं॥ तत्पश्चिमोप
रिस्थैकपदे दक्षिणस्फिचि भृंगं॥ तत्पश्चिमे नैर्ऋत्यकोणपदे पादयोः क्षिपन्॥ तदुत्तरैकपदे वामस्फि
चि दौवारिकं॥ तदुत्तरपदे तत्प्राक्पदे च वामजंघायां सुग्रीवं॥ तदुत्तरपदद्वये वामजानौ पुष्पदंतं॥ त
दुत्तरपदद्वये वामोरौ जलाधिपं॥ तदुत्तरपदद्वये वामपार्श्वे असुरं॥ तदुत्तरपदद्वये वामपार्श्वे एव
शोषं॥ तदुत्तरोपरिस्थैकपदे वाममणिबंधे पापं॥ तदुत्तरवायव्यकोणपदे वामप्रवाहौ रोगं॥ तत्प्रा
गेकपदे वामप्रवाहावेव अहिं॥ तत्प्राक्पदे तद्दक्षिणपदे च वामकूर्परे॥ मुख्यं तत्प्राक्पदद्वये वामबा
हौ भल्लाटं॥ तत्प्राक्पदद्वये वामबाहावेव सोमं॥ तत्प्राक्पदद्वये वामांसे सर्पं॥ तत्प्राक्पदद्वये वामश्रोत्रे अ
दितिं॥ तत्प्रागुपरिस्थैकपदे वामनेत्रे दितिं॥ तद्दक्षिणे शिखिपदाधः कोणपदमुखे अपं॥ आग्नेये वापदाधः

कोणपदे दक्षिणहस्ते सावित्रं। नैर्ऋत्ये पितृपदाधः कोणपदे मेढ्रे जयं॥ वायव्ये ये रोगपदाधः कोणपदे वाम
हस्ते रुद्रं॥ मध्यमपदे श्वीशानकोणपदाद्दक्षिणपदत्रये दक्षिणस्तने अर्यमणं॥ तद्दक्षिणाग्नेयैककोणप
दे दक्षिणहस्ते सवितारं॥ तत्पश्चिमपदत्रये जठरदक्षिणभागे विवस्वतं॥ तत्पश्चिमनैर्ऋताकोणपदे वृ
षणयोर्विबुधाधिपं॥ तदुत्तरपदत्रये जठरवामभागे मित्रं॥ तदुत्तरवायव्यकोणपदे वामस्ते राजय
क्ष्माणं॥ तत्प्राक्पदत्रये वामस्तने पृथ्वीधरं॥ तत्प्रागीशानकोणपदे उरसि आपवत्सं॥ मध्यनवपदेषु ह
न्नेभ्यो ब्रह्मणं॥ ततउत्तरे वृषवास्तुं वास्तोष्पते वसिष्ठो वा वस्तोष्पतिस्त्रिष्टुप्॥ ॐ वास्तोष्पते प्रतिजानीह्य
स्मानिति मंत्रेण स्थापयेत्॥ स च सुवर्णस्य रूप्यस्य वा ततो मंडलाद्बहिरिशानादिकोणेषु चरकीं विदारीं पूत
नां पापराक्षसीं पूर्वादिक्षु स्कंदमर्यमणं जंभकं पिलिपिलिपिछं च नाममंत्रैः संस्थाप्य प्रागाद्यष्टदिक्षु इंद्रादी
स्तत्तन्मंत्रैर्नामभिर्वा संस्थाप्य तदास्वित्यावाह्य भ्यर्च्य मंडलादीशानां कलशं स्थापयेत्॥ केचित्तु ब्रह्मादिदेव
तास्थापनं वदंति॥ ततोन्वाधानं कुर्यात्॥ तत्र चक्षुषी आज्येनेत्यंतमुक्त्वा नवग्रहानष्टशताष्टाविंशत्यष्टान्यत

मसंख्याभिः समिद्भिस्तिलाहुतिभिश्च अधिदेवताप्रत्यधिदेवताविनायकादीन् चतुःसंख्याभिः समित्तिलाज्याहु
तिभिः शिखादिपंचचत्वारिंशद्देवता अष्टसहस्राष्टशताष्टाविंशत्यष्टान्यतरसंख्याभिः समित्तिलाज्याहुतिभि
॥र्वास्तोष्पत इति च सृग्भिः सृग्भिः क्रमेण अमंतरोक्तसंख्याभिः समित्तिलपायसाज्याहुतिभिर्वास्तुं वास्तोष्पत
इति च सृग्भिर्वास्तोष्पते ध्रुवा स्थूणामित्यनया च क्रमेण पंचैकान्यतरसंस्थाभिर्बिल्वाहुतिभिस्तद्बीजाहुति
भिर्वा चिरक्यादीनष्टौ चतुरसंख्याभिः समित्तिलपायसाज्याहुतिभिः शेषेण स्विष्टकृतमित्यादिनिर्वापपूर्वकमा
ज्याभागांतं कुर्यात्॥ यजमानो द्रव्यत्यागं कुर्यात् होमांते आचार्यः स्विष्टकृदादिप्रायश्चित्तहोमांतं कृत्वा दिक्पा
लनवग्रहक्षेत्रपालेभ्यः सदीपमा॥ बलं भक्तबलीन् दत्वा मूर्धानमिति पूर्णाहुतिं जुहुयात्॥ वैश्वानराय इदं न ममेति त्या
गः॥ प्रणीतानिनयनादिकर्मशेषं समाप्य वास्तुमंडलपश्चिमदेशे शिखिने एष पायसबलिर्नम इत्येवं शिखा
दिभ्यो बलीन्॥ दद्यात्॥ तान्विप्रे घृतयुतपायसेन क्षत्रियादौ वक्ष्यमाणैः॥ पक्वैस्तदलभः पायसेनेति॥ ततश्च
रक्यादिभ्यस्तथैव माषभक्तबलीन् दद्यात्॥ ततः आचार्यादयः समुद्रे ज्येष्ठा इत्यादिवैदिकैः सुरास्त्वेत्यादिपौरा

गोश्वमंत्रैर्युज्यमानेसपत्निकंगोतिकक्षगोरकेनाभिषिच्यसर्वौषधीभिरनुलिप्यस्नापयेयुः॥ततआचार्योब्रह्म
स्थानेसुरूपांभूषितांस्त्रीरूपांपृथ्वींध्यात्वार्घंदद्यात्येनमंत्रेणप्रपूजयेत॥मंत्रस्त्वमयेवोक्तवा
रुक्षइत्यमयपरमिति॥ततोगृहप्राङ्मुखंस्थित्वाचमनेनसक्तेनरक्षोघ्नंचवेक्षयेत॥छिन्नेस्रक्षेसुमं॥
ततोदुग्धपूर्णायावमस्तनकुंभातयेवस्रुक्षयेनधारयाविछिन्नंकुर्यात॥अथयज्ञमानोय
ज्ञियेवृक्षेकाशयेज्जानुदघ्नमवटंखात्वातंगोमयेनोपलिप्यशुक्लचंदनपुष्पाक्षतादिभिरर्चयेत्कृत्वाग्ना
ग्नादिसप्तबीजानिदध्नोदनेचप्रक्षिप्यनवकुंभजलपूर्णेशुक्लेकपुष्पयुतेगंधाद्यभिरर्चितेहस्तदयेनाद्राय
जानुभ्यामवनीगत्वा॥इंद्रनमोवारुणायेतिनद्यंतेनगर्तंपूरयेत॥तत्रवावर्तेप्रक्षिप्यपुष्पंचोर्ध्वमुखंस्थु
भंवैयरीत्येत्यनेन॥ततोमृन्मितपरिकायांसप्तबीजदध्योदनंगोबालपुष्पाणिप्रक्षिप्यपूर्वस्थापितंह
पवास्रुक्तूर्यमंगलघोषेणनीयतत्रोप्तंस्थाप्यगंधा॥दिग्भिमंपूजयार्घंयेधरामा॥पूजितोसिमयावास्तो॥हा
माघैरर्चनैःशुभैः॥प्रसीदपार्थिवश्रेष्ठहिमेगृहेसुखं॥वास्तुपुरुषनमस्तुभ्यंशय्यायांभिनतप्रभो॥मद्

गृहधनधान्यादिसमृद्धंकुरुसर्वदेति॥ततःपरिकामाच्छाद्यतस्मिन्गर्तेगानेनिक्षिपेदनेमंत्रेणमंत्रेण॥मंत्रौच
सागराएत्थीयथावहन्तिमूर्धनि॥तथामावहकल्याणंसंपत्संततिभिःसहेति॥गर्तेचतथैवमृत्पूरितेम
ध्येकाउन्नमय्यमध्यमंमूलेथमंत्रेविधात॥गर्भोपरिभूमिगोमयेनोपलिप्यशुक्लगंधपुष्पाक्षतैर्भूष
येत॥ततोग्रेःपश्चिमतआचार्यंसपत्न्याकृतसवत्सागावोमायुगंचरश्मिणाहत्वाब्रह्मर्त्विग्भ्योयथाशक्ति ई
त्यादाणांशिरस्याहित्वास्कंदेवतानांचपूजांकृत्वाक्षमाप्यउत्तिष्ठन्तुदेवेतिविसृज्याचार्यहस्तंप्रतियाद्यग्नि
संपूज्यगच्छगच्छेतिविसृज्यब्राह्मणैःशांतिपाठंकारयित्वायज्ञादीनांशिरस्याद्रीनांचघृत्यर्घंप्रत्येकंत्रीस्त्रीनेकेकस्य
यशक्तिब्राह्मणानसंभोज्यशिषोगृहीत्वामुदाकृतोभुंजीत॥एवंप्रथमेऽह्निवास्तुशांतिविधायद्वितीयेऽह्निग
हप्रविशेत्प्रधानगृहमध्यधामोपरितंकलशंस्थापयेत॥ततोगृहस्थःसर्वार्थंपुण्याहंवाचयित्वाब्राह्मणान्सं
पूज्यभोजयित्वाशिषोगृहीत्वामुदाकृतोभुंजीत॥इतिदिनकरभट्टकृतेशांतिसारेवास्तुशांतिप्रयोगः॥॥अथ
ज्येष्ठरजोदर्शनेशांति॥ज्येष्ठेरजोदर्शनेचैत्रज्येष्ठाषाढभाद्रपदकार्त्तिकपौषप्रतिपत्षष्ठीचतुर्दशीचास्त्रीरिक्तापाप

वाराण्यार्द्रापुष्याश्लेषापूर्वाज्येष्ठामूलपूर्वाषाढापूर्वाभाद्रपदाव्याघातगंडानिगंजशूलवैधृतिव्यतीपातपरिघपू
र्वार्धभद्रान्निधाविभक्तदिनात्यभागरात्रिसंध्यापापलग्नसंक्रांतिदग्धदिनरविचंद्रोपरागाशौचजीर्णारुणनी
लस्तृपितृपरगृहाअशुभाः॥अत्रदोषबहुत्वेएवशांतिकंकार्यं॥प्रभूतदोषोयदिदृश्यतेतत्पुष्पतदाशांतिक
कर्मकार्यं॥इतिवसिष्ठसंहितोक्तेः॥प्रभूतदोषेवैधव्यतिःसततित्वापादकेइति॥केचित्अर्थमाहुः॥ग्रहणे
तुरजोदर्शनेदोषैकत्वेपिशांतिः॥ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते॥व्याधिपीडातदास्त्रीणामादौतुरुदर्श
नादिति॥शौनकेननिरपेक्षस्यनिमित्तत्वात्केतत्रशांतिर्वक्ष्यते॥कृतेपिशांतिकेशुद्धकालीनरजोदर्शनावधि
संगोनकार्यः॥विवर्जयेदेवतदैकशय्यांयावद्रजोदर्शनमुत्तमेह्नितिवसिष्ठोक्तेः॥शांतिरुक्तातेनैवाचेदुष्टेभ
द्भिनवोदकुंभसलिलैःसन्मंत्रितैरोषधैःस्नानंपापदंसपंचकलशैःकार्यंसमृद्धीजकैः॥ऐशान्यतोगोमयमंड
लेचपरिस्तृतेग्नौजुहुयाच्चदूर्वां॥युग्मांघृताक्तांचसमित्प्रमाणांगायत्रिसंज्ञाष्टसहस्रसंख्याशतप्रमाणाम
थवाद्यहंत्रींशुभांयवैर्व्याहृतिस्तिलैश्च॥ततःसुरान्भूमिसुरान्पितॄंश्चसंतर्पयेदन्नसुवर्णयस्त्रैः॥प्रयोग

पारिजातेशौनकः॥सार्त्तवानांतुरीणांशांतिंवक्ष्यामिशौनकः॥पंचमेह्निचतुर्थेवाग्रहातिथ्यपुरःसरं॥द्रोणप्रमा
णघात्येनव्रीहिराशित्रयंभवेत्॥कुंभत्रयंन्यसेद्राशौतुंतुवस्त्रादिवेष्टितं॥पूरयेत्तीर्थसलिलैःप्रतिकुंभंपृ
थक्पृथक्॥सूक्तेनाथनचर्वेनप्रसुवआपइत्यथ॥सऋचयाःप्रवतस्तद्वद्गायत्र्याचततःक्रमात्॥मध्यकुंभे
क्षिपेद्धान्यमौषधानिचहेमच॥उदुंबरःकुशादूर्वाराजीवंचरविल्वकाः॥विष्णुक्रांताचतुलसीबर्हिवंशंख
पुष्पिका॥शतावर्यश्चगंधाचनिगुंडीसर्षपद्वयं॥अपामार्गःपलाशश्चपनसोजीवकस्तथा॥प्रि
यंगवश्चगोधूमाव्रीहयोश्वत्थएवच॥क्षीरंदधिचसर्पिश्चपद्मपत्रंतथोत्पलं॥कुरंटकत्रयंगुंजावचा
भद्रकमुस्तका॥द्वात्रिंशदौषधानीहयथासंभवमाहरेत्॥मृत्तिकाश्चौषधादिनितन्मंत्रेणक्षिपेत्क्र
मात्॥कुंभोपरिन्यसेत्पात्रंकांस्यंमृद्वेणुताम्रजं॥भुवनेश्वरींन्यसेत्क्रत्रइंद्राणींचपुरंदरं॥आचार्यःपू
जयेद्वान्योगायत्र्यामंत्रसारयाः॥इंद्राणींपूजयेद्देवीमिंद्राणीमासुनारिषु॥क्रमेणपूजयेदिंद्रत्वावृष
भंवयं॥आवाहनादिसकलैरुपचारैःप्रपूजयेत्॥तन्मध्येसंस्पृशन्कुंभंमंत्रेणभुवनेश्वरीं॥जपेद्गात्र

त्रीमं होमाद्धीस्रुक्चजपेन्ततः॥स्रुग्वेरङ्गिणकुंभमंडलेजपेत्थचत्वारिरुद्रसूक्तानिचनुर्मंत्रोत्तराणि॥
च॥समश्नमुतरकुंमंत्रीरुद्रंरुद्रसंख्यया॥ततइद्धाग्निसूक्तंचततेवतिसमिश्चेवइवोमिरेकैकाचाकृतिमंत्रे
नु॥अथोत्तरंसदस्यवाशतमथोत्तरंतुवा॥गायत्रेचचतुर्होतव्यंहविरत्रचचतुष्टयं॥एवंकारंहिरण्मिइयोहोमो
नास्तीतिकेचित्॥ततस्त्विष्टकृतंकृत्वासमुद्राद्भूर्मिसूक्तं॥ततोमाजस्थागतापूर्णाकृतिमथाचरेत्॥अथा
भिषेकंकुर्वीतप्रतिपक्कुंभस्थितोदकैः॥आपोहिष्ठेतितिसृभिःसूक्तेनचततःपरं॥इडोऽग्नेतेचनेवपावमानेःक
मणवु॥उभयंशणुवचनस्तिरोविशणकाया॥अंबकेनसमंत्रेणजानवतंवरसकंतथा॥समुद्रज्येष्ठाइत्या
दित्रायतोचत्रिभिःक्रमात्॥इमाआप्यश्चेनेवरुवस्यत्वेतिमंत्रतः॥मंत्रेणाथतमीशानंत्वमग्नेरुद्रइत्यथा॥
तमुष्टुहीतिमंत्रेणभुवनस्यपितरंतथा॥यातेरुद्रेतिमंत्रेणशिवसंकल्पमंत्रतः॥इदंत्वाजषमंत्रेपंचमंत्रे॥
अथाभिषेचयेत्॥धेनुंपयस्विनींस्नातःसजायोयजमानकः॥मरुत्सुमनसाहप्रवद्भुद्भ्रायतेत॥महाजा
तिप्रजाप्यांथब्राह्मणान्भोजयेन्ततः इति॥अथास्पितृकृतप्रयोगः॥ऐंद्राकौसौम्यत्वाममपत्यंप्रथमरजो

ग्नेमुकंदुष्टमासादित्यूचितमकसादिष्टनिरासद्वारश्रीपरमेश्वरप्रीत्यर्थंसंयमरक्षोत्कोत्कृतिकरिष्ये
इतिसंकल्पगणेशपूजनपुण्याहवाचननांदीश्राद्धाचार्यब्रह्मर्त्विग्वरणानिकुर्यात्॥कृत्विजश्चाद्यौषधैश्चत्वा
रोवा॥ततश्चाचार्योगृहेशानेरक्षोनदक्षिणेनरयोश्चमहीघोरितिभूमिस्पृष्ट्वौषधयःसंवदंतइतिद्वाभ्यांप्र
माणंव्रीहीणांराशित्रयंकृत्वातत्रकुंभत्रयमाकलशेधितिस्थापयेत्॥सर्वत्रमंत्राहुतिः॥ततःप्रसुवश्चा
पइतिनवर्चेसंसूक्तस्यसिंधुद्वीपऋषेर्मेधातिथेर्गायत्रीदेवतापूरुरवसोविनियोगः॥प्रसुवश्चापइत्यादि
।याःप्रसवतइत्यस्यविश्वेदेवाऋषयःशाकरविनियोगः॥प्राग्नेत॥गंधद्वारामितिऋचिपिंगंधयार्ओषधीरिति
सर्वौषधी॥ओषधयःसमितियवाततोमध्यकुंभेषुयवव्रीहीतिलमाषकंगुंजपामाकमृद्वानडिस्वाणा
यग्रोडुंबरकुशाडूर्वारक्षोमलवंपकबिल्वबिल्लुकातानुलसीबर्हिषंशंखपुष्पीशतावर्यश्चगंधानिगुंडीर
क्षपीतसर्षपामागेपत्राशायनसन्नीवकप्रियंगुगोधूमव्रीहयश्चत्यरधिदुग्धघृतपद्मपत्रनीलोत्पलमिनरक्ष
र्पीतःकेरंटकंगुंजावबानडकमुस्तकारग्वानिद्वात्रिंशदौषधानिसर्वाणियथासंभवंवाक्षिपेत्॥ततस्त्विषुकृ

ऽरिष्टिरिहवो॥ॐअग्नयेवऽतिपवयस्वदेवान्॥स्योनापृथिवीतिमऽरंयाःफलिनीतिफलानिसदिरत्नानीतिप
वरत्नानिहिरण्यरूपऽइतिहिरण्यंचक्षिपेत्॥युवासुवासाऽइतिसूत्रेणवाससाकलशंकंठानुवेष्टयित्वागंधा
क्षताद्भिःकलशमभ्यर्चयेत्॥ततःकलशत्रयोपरिनैवक्रमेणसौवर्णंराजतंताम्रमयंवेण
वंमन्मयंवायवाद्यपूरितंपात्रत्रयंपूर्णाऽस्वतिनिधायतदुपरिस्थितेवस्त्रत्रयेसप्तत्रीव्रीहीनाद्यैर्नाम
ग्रहानिकुर्यात्॥तत्रमध्यमेगायत्र्याविश्वामित्रोभुवनेश्वरीगायत्रीभुवनेश्वर्योवाहनाऽसोविनियो
गः॥ॐतत्सवितुःऽइतिभुवनेश्वरीमावाहयामीतियथाशक्तिसुवर्णेनिर्मितांभुवनेश्वरीप्रतिमामुत्तारणपू
र्वंस्थापयेत्॥तद्दक्षिणकुंभोपरिवस्त्रेऽइंद्राणीमावाहयामीतिपद्मकपरिंद्राणीयक्षिःऽइंद्राणीवाहनेविनियोगः॥ऽ
तरकलशोपरिऽइंद्रत्वाविश्वामित्रऽइंद्रोगायत्रीऽइंद्रोवाहनेविनियोगः॥ऽऊर्ध्वमंत्रैःपूजांकुर्यात्॥ततोमध्यकुं
भमाचार्योऽसहस्रमशतंगायत्रीजप्त्वाश्रीसूक्तंजपेत्॥ततएकोऋत्विग्दक्षिणकुंभेऽइंद्रसूक्तानिजपेत्
तानिचकंडुंद्रायेतिनवऽमारुद्रायतवस्त्वेकाद्दशातेपतिरितिपंचदशऽमारुद्रायस्थिरधन्वनऽतिचत

राम॰ ६१

स्रः॥ॐआवोराजानमित्येकांतमुष्टुहीत्येकांभुवनस्यपितरंयेबकमिति॥ॐयान्योऋत्विगुत्तरकुंभेएकादशा
क्षत्रिनीरुशन्वऽइंद्राग्नीतिसूक्तंचजपेत्॥ततआचार्यःकुंभपश्चिमेग्निरक्षाप्यतरीशान्यांग्रहाद्दीस्तन्नमत्रैरावाह
षोडशोपचारैःसंपूजयतद्दीशान्यांप्रागग्रंवृतंकुंभंसंस्थाप्यतत्रवरुणंवाद्याद्याधानंकुर्यात्॥चक्षुषीऽआप्येनंवृत
मुक्तानवग्रहानप्रत्येकंमऽसंस्थाभिःसमिभिस्राज्याकृतिभिरधिदेवताःप्रत्यधिदेवताश्चचनुःसुरक्षाभिःसमि
भिस्राकृतिभिर्भुवनेश्वरीमऽसहस्राक्षीशतावतरसंख्याभिर्ऽवोतिसमिश्रंगोधूमपायसान्नाकृतिभिरिंद्राणीमिं
द्राक्षविंशतिसंख्याभिर्ऽवोतिसमिश्रंगोधूमपायसान्नाकृतिभिःशेषेणस्विष्टमित्यादिपूर्णपात्रनिधानांतंकृत्वा
गोदुग्धेपायसंश्रपयित्वाज्यभागांतंकुर्यात्॥ततोयजमानोदक्षिणतउपविश्यप्रदक्षत्यागंकुर्यात्॥आचार्योहो
मानंतरंस्विष्टकृदादिप्रायश्चित्तहोमांतंकृत्वाद्दिक्पालनवग्रहभुवनेश्वरीद्राणीऽइत्येतैःपालेपोमारवमंत्रब
लीन्मंत्रैर्दत्वासमुद्वाद्यैर्निरितिमंत्रेणपूर्णाहुतिंकृत्वाप्रणीताविमोकादिकर्मशेषंसमाप्यसर्वंकलशो
दकेनधृतनवस्त्रंयजमानंताद्दशीचभार्यांसर्त्विगभिषिंचेदेतैर्मंत्रैःआपोहिष्ठेतिसमिःगंधद्वारेतिद्वियतद्द

येकत्रिमिष्टदेवेनिसप्तउभयश्रुणवच्चनःस्वस्तिहाविशः अेवकंज्ञातवेदसेसमुद्वयेष्टतिचतस्रःचायंता
मितिस्रःचायंतामितिस्रःइमाआपइतितिस्रःइवस्पत्वेतायस्तःवशारवागतास्वयं॥तमीशानं॥त्वमग्नेरुद्रः॥
तमुष्टुहिभुवनस्यपितरंयातेरुद्रःयज्ञायतइतिषड्रुत्वाऋषभंवयधेनुरुद्रजमितिपंचःसुराम्त्वामभिषि
ंचेचित्याद्यऋत्विजःपौरोणाःयजमानोग्निमाचार्यादीश्वरंपूज्याचार्योयधेनुरुद्राज्ञापितेसद्दक्षिणांमनसाहब्रह्मऋ॰
त्विग्भ्योयशसाकिंनूयसीर्दक्षिणाददात्॥ततोभुवनेश्वर्योदीनायहाणाचोत्तरपूजांकृत्वोत्तिष्ठेयानुद्देवगणा
इतिविसृज्याचार्योयप्रतिपाद्याग्निंसपूज्यगच्छगच्छेतिविसृज्यैकांतिपाठयित्वाभुवनेश्वर्योदीनायहाणाचप्री
तयेचीत्वाब्राह्मणान्भोजयित्वाभुंजीत॥इतिदुष्टरोगेनशांतिः॥अथकुशांतिंव्याख्यास्यामस्तिथिवारनक्ष
त्रयोगेषशांत्यर्थंचतुर्थीङिपंचमीङिवाशांतिंवानपुंकुवंतेत्यादिप्रयोगेहवाप्रस्थाप्यमिधोमेस्तर्धस्तइंसमस्तर्धै॰ रम॰
स्तिसैश्वरंतिमावंचतुरस्रंकृत्वादक्षिणादद्याद्याचार्योथविशेषतस्तोनारीषान्मुच्यतेत्याह॥भगवानुवोधा ६३
यन॥त्वथकर्मायावास्वैवेधव्यहेतुस्मरणायहोमशांतिः॥मार्केरेये॥वास्वैवेधव्ययोगानुकुंभदुप्रतिमादिभि॥कृत्वा

त्वामध्यनसिनमुच्चिरत्वकुशेर्द्वाभिःप्रतिच्छाद्यतस्मिन्नतंवेष्टितंकुंभंनिधायायोवाऽमंसर्वमित्येतेनानुवा
केनाच्छिद्रमग्निंचकुंभमुखेपूरयित्वाकूर्चंमंत्रार्घंयपंचपल्लवान्यत्वकंनिक्षिप्यनवरत्नंचनववस्त्रयुग्मेनाच्छाद्य॰
नारिकेरफलेनापिनिधायवित्तपल्लवैश्चूतपल्लवैश्चाविकार्यपुरुषंपुरःस्थाप्यसंधातागंधपुष्पधूपदीपैःकुंभमभ
र्च्यार्थश्रियाश्चवकुरुक्षेत्राननश्चचतुरोवाब्राह्मणान्वरणपूर्वंमभ्यर्च्याचार्यंचतेकुंभमन्वारभ्यवेदसंवीगायत्रीमह
स्राष्टकंशताष्टकंवावस्तोगायत्रीचेवद्वादशीनापोहिष्ठामयोभुवइतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइत्येत
मनुवाकंपवमानःसुवर्जनइत्येतमनुवाकंपुरुषसूक्तंकृत्वाप्राचीमिमंमनुवाकंनकृत्विजःप्रत्येकमाज्यौरेरुरा॰
रस्थापयेयुस्ततोनारीपाद्यंप्रार्थयित्वाग्नुत्तोस्तोऽग्निंकल्पयित्वास्थंडिलंकल्पयित्वास्थंडिलविधानेनाग्निमुत्सार्यविष्णुसूक्तेनग
ताष्टकसंख्ययापलाशसमिधोहुत्वेवंन्यसकेनान्नरुद्रसूक्तेनान्यतमाभ्यांशांतिकृत्वोथापुण्याहंमधुसूक्तेर
नान्यतमेनहुत्वानंतोनक्षत्रहोमंतन्मंत्रेणनस्पचतुर्दशाहुत्वापूर्ववन्नमभिरन्नाप्येत्यंतंचकयज्ञामहेतीतिसप्तहोमशता
ष्टकाहुतीरुपसुहुयात्स्विष्टकृत्वासप्तभिरुमाधेनुवरप्रदानादथदक्षिणांदद्याद्याचार्योथविशेषतस्तोनारीषान्मु

अनेत्याह॥ भगवान्बौधायनः॥ त्वथ कन्यायाबालवैधव्यहेतुलक्षणग्रहयोगशांतिः॥ मार्कंडेये॥ बालवैधव्ययोगोतु
कुंभद्रुप्रतिमादिभिः॥ कृत्वा लग्नं ततः पश्चात्कन्योद्वाह्येति चापरे॥ तत्र पुनर्भूदोषाभाव उक्तो विनामखंडे॥ स्वर्णाद्युपि
प्रसाचैव प्रतिमा विष्णुरूपिणी॥ तया सह विवाहे तु पुनर्भूत्वं न जायते॥ सूर्यारुणसंवादे॥ विवाहात्पूर्वकाले च चंद्र
ताराबलान्विते॥ विवाहोक्ते च मंथन्या कुंभेन सह वोद्वहेत्॥ सूत्रेण वेष्टयेत्पश्चाद्दशतंतुविधा- तः॥ कंकुमालंकृ
तं देहं तयोरकांतमंदिरे॥ ततः कुंभं च निसार्य प्रमृज्य सलिलाशये॥ ततोभिषेचनं कुर्यात्पंचपल्लवं वादिभिः॥ कुंभप्रा
र्थना तत्रैव॥ वरुणस्वरूपाय जीवनानां समाश्रयः पतिं जीवय कन्यां श्रियं पुत्रमुखं कुरु॥ देहि विष्णुवरादेव कन्यां पाल
य दुःखतः॥ ततोलंकारवस्त्रोद्यांवराय प्रतिपादयेत्॥ इति कुंभविवाहः॥ मूलदानमंत्रं तत्रैवोक्तं॥ ब्राह्मणं साधुमाम
त्र्य संपूज्य विविधार्हणैः॥ तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजं॥ शुद्धवर्णसुवर्णेन वित्तशक्त्याथवा पुनः॥ निर्मि
तां रुचिरां शंखगदाचक्राब्जसंयुतां॥ दधानां वाससी पीते कुमुदोत्पलमालिनीं सदक्षिणां च तां दद्यान्मंत्रमेनमु
दीरयेत्॥ यन्मया प्राचि जनुषि घ्नंत्या पतिसमागमं॥ विषोपविषशस्त्रावैर्हतो चातिरया प्रथमानं महाघोरवशं सौ

ख्यनापहं॥ वैधव्याद्यतिदुःखौघनाशाय सुखध्वये बहुसौभाग्यलब्धौ च हा विष्णोरिमां तनुं॥ सौवर्णीं निर्मितां शक्त्या
नुभ्यं संप्रददे द्विजः॥ अनयापाहमस्मीति त्रिवारं प्रजपेदिति॥ एवमस्त्विति तस्योक्तिं तं गृहीत्वा स्वगृहं विशेत्॥ ततो वैवा
हिकं कुर्याद्विधिदाता मृगीदृशः॥ अथार्कविवाहः॥ मात्स्ये कश्यप उद्वहेदिति सिध्यर्थं तृतीयां न कदाचनः॥ मोदज्ञानं ततो
वापि यदि गच्छेत्तु मानुषीं॥ नश्यते वनसंदेहो गर्गस्य वचनं यथा॥ संग्रहे॥ चतुर्थादिविवाहार्थं तृतीयेर्कं समुद्वहेत्॥ आदि
त्यदिवसे वापि हस्तर्क्षे वशनैश्चरे॥ शुभे दिने चापूर्वाह्णे कुर्यादर्कविवाहार्थकं॥ ब्राह्मे॥ ग्रामात्प्राच्यामुदीच्यां वा सपुष्प
फलसंयुतं॥ परीक्ष्य यत्नतो धस्तात्स्थंडिलादि यथाविधि॥ कृत्वार्कं पुरतस्तिष्ठत्प्रार्थयेत द्विजोत्तमः॥ त्रिलोकवासिन्समा
सान्वच्छायया सहितो रवे॥ तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॥ तत्राध्यारोप्य देवेशं छायया सहितं रवि॥ वस्त्रै
र्माल्यैस्तथा गंधैस्तन्मंत्रेणैव पूजयेत्॥ तन्मंत्र आकृष्णेनेति॥ चतुर्थदिवसे तीते पूर्ववत्तां प्रपूजयेत्॥ विसृज्य होम
मग्निं च उद्वहेन्मानुषीं परां॥ व्यासः॥ सपुष्पफलशाखैकमर्कगुल्मं समानयेत्॥ अर्ककन्याप्रदानार्थमाचार्यकल्प
येत्पुरा॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत्॥ नांदिश्राद्धे हिरण्येन अष्टवर्गान्प्रपूजयेत्॥ पूजयेन्मधुपर्केवरं

विप्रस्य हस्ततः॥ यज्ञोपवीतवस्त्रं च हस्तकर्णादिभूषणं॥ उष्णीषगं माल्यादि वरायास्मै प्रदापयेत्॥ अर्कं प्रदक्षिणं कु
र्वन् जपेन्मंत्रमिमां बुधः॥ मम प्रीतिकरो योयं मया सृष्टा पुरातनी॥ अर्कजा सवितुरात्मब्राह्मणा सृष्टा अस्माकं प्र
तिरक्षतु॥ पुनः प्रदक्षिणीकुर्यान्मंत्रेणानेन मंत्रवित्॥ नमस्ते मंगले देवी नमः सवितुरात्मजे॥ त्राहि मां कृपया देवी
पत्नी त्वं मे इहागता॥ अर्कं त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च॥ वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः॥ तृती
योद्वाहजं पापं मृत्युं चाशु विनाशय॥ ततः श्वकन्यावरणं त्रिपुरुषं कुलं चरेत्॥ आदित्यः सविता चार्यः पुत्री पौत्री च
नसाका॥ गोत्रं काश्यप इत्युक्तं लोके लौकिकमाचरेत्॥ मुहूर्तेर्कं निरीक्षेत स्वस्ति सूक्तमुदीरयेत्॥ आशीर्भिः सहि
तैः कुर्यादाचार्यप्रमुखद्विजैः॥ अथाचार्यं समाहूय विधिना तन्मुखाच्च तां॥ प्रतिगृह्य ततो होमं गृह्योक्तविधिनाचरे
त्॥ अर्ककन्यामिमां विप्र यथाशक्तिभूषितां॥ गोप्रायशर्मणे तुभ्यं दत्तां विप्र समाश्रय॥ दानमंत्रः अंजलिं सतकर्मा
णि कृत्वा कंकणपूर्वकं॥ यावत्पंचावृतं सूत्रं तावदर्कं प्रवेष्टयेत्॥ स्वशाखोक्तेन मंत्रेण गायत्र्या वाथवा जपेत्॥ पं
चीकृत्य पुनः सूक्तं स्कंधे बध्नाति मंत्रतः॥ बृहत्सामेति मंत्रेण सूत्ररक्षां प्रकल्पयेत्॥ अर्कस्य पुरतः पश्चाद्दक्षिणो

त्तरतस्तथा॥ कुंभांश्च निपेत्पश्चादाग्नेयादिचतुष्टये॥ सवस्त्रं प्रतिकुंभं च त्रिःसूत्रेणैव वेष्टयेत्॥ हरिद्रागंधसंयु
क्तं पूरयेच्छीतलं जलं॥ प्रतिकुंभं महाविष्णुं संपूज्य परमेश्वरं॥ पादार्घ्यादिनैवेद्यांतं कुर्यान्नाम्नैव मंत्रवित्॥ पुनः प्र
दक्षिणं कृत्वा मंत्रमेतमुदीरयेत्॥ मया कृतमिदं कर्म स्थावरेषु जरायुणा॥ अर्कापत्यानि देहि तत्सर्वं क्षंतुमर्हसि
॥ इत्युक्त्वा शांतिसूक्तं जप्त्वा तं विसृजेत्पुनः॥ गोयुग्मं दक्षिणां दद्यादंते पुण्याहमाचरेत्॥ शौनकः॥ तृतीये स्त्रीविवाहे
तु संप्राप्ते पुरुषस्य तु॥ अर्कविवाहं वक्ष्यामि शौनकोर्हविधानतः॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत्॥
नादिश्राद्धं प्रकुर्वीत स्थंडिलं च प्रकल्पयेत्॥ अर्कमभ्यर्च्य सौर्या च गंधपुष्पाक्षतादिभिः॥ सौरी आकृष्णेनेति॥ स्व
यं चालंकृतस्तद्वद्वस्त्रमाल्यादिभिः शुभैः॥ अर्कस्योत्तरदेशे तु समन्वारब्ध एतया॥ एतया अर्ककन्यया॥ उल्लेखना
दिकं कुर्यादाघारांतमतः परं॥ आज्याहुतिं च जुहुयात्सांगोभिरनयैकया॥ यस्मै त्वा कामकामायेत्येतयर्चा ततः
परं॥ व्यस्ताभिश्च समस्ताभिस्ततश्च स्विष्टकृद्भवेत्॥ परिषेचनपर्यंतमयाश्वेत्यादिकं क्रमात्॥ अथ प्रयोगः॥ शुभ
दिने ग्रामात्प्राच्यां वार्कसमीपं गत्वा देशकालौ संकीर्त्य मम भावि तृतीयमानुषीपरिणयस्य शुभतासिध्यर्थं अ

र्कविवाहं करिष्य इति संकल्प्य गणेशपूजनपुण्याहवाचनमातृकापूजननांदिश्राद्धाचार्यचरणानि कुर्यात्॥ ततो वरो
र्कपुरतस्तिष्ठन्सूर्यं प्रार्थयेत्॥ त्रिलोकवासिन्यसाश्वच्छायया सहितो रवे॥ तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॥
ततो कवृक्षच्छायासहितं सूर्यं आकृष्णेनेति मंत्रेण षोडशोपचारैः॥ पूजयेत्॥ तत्र वस्त्रदानकाले वस्त्रेण तंतुभिश्चार्क
मावेष्टयेत्॥ अभिषेके आपो हि ष्ठेत्यादयो मंत्राः ततः आचार्यो वरं मधुपर्कयज्ञोपवीतवस्त्रभूषणोष्णीषगंधमाल्यै
ः पूजयेत्॥ ततो वरोर्कं प्रदक्षिणीकुर्वन्॥ मम प्रीतिकरायेयं मया सृष्टा पुरातनी॥ अर्कजा ब्रह्मणा सृष्टा अस्माकं
प्रतिरक्षतु॥ इति जपेत्॥ पुनः प्रदक्षिणं कुर्वन् नमस्ते मंगले देवि नमः सवितुरात्मजे॥ त्वाहि मां कृपया देवि पत्नी
त्वमेइहागता॥ अर्कत्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च॥ वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः॥ तृतीयो
द्वाहजं दोषं मृत्युं चाशु विनाशय॥ इति जपेत्॥ ततः कन्यां प्रयच्छेदाचार्यं प्रार्थयेत्॥ ततआचार्यः काश्यपावत्॥ सा
रनैध्रुवेति त्रिप्रवरान्वितकाश्यपगोत्रोत्पन्नाआदित्यस्य प्रपौत्री सवितुः॥ पौत्रीं ममामुकशर्मणः पुत्रीं अर्कनाम्नीं
कन्यां अमुकामुकप्रवरान्वितामुकगोत्रायामुकप्रपौत्रायामुकपौत्रायामुकनाम्ने वराय दास्ये इति वाग्दानं कुर्या

त्॥ ततः वरः सुमुहूर्ते अर्ककन्यां निरीक्ष्य स्वस्ति नो मिमीतेति सूक्तं पठेत्॥ ततआचार्यो वाग्दानवत् गोत्राद्युच्चार्य
इमामर्ककन्यां तुभ्यं संप्रददे॥ न ममेति वरहस्ते जलं दत्वा अर्ककन्यामिमां विप्र यथाशक्ति विभूषितां॥ गोत्रा
य शर्मणे तुभ्यं दत्तां विप्र समाश्रयेति पठेत्॥ ततआचार्यो वरस्य कंकणबंधनं सूत्रेण कृत्वार्ककन्याप्रतिनि
धित्वेनाक्षतारोपणं तदुक्तमंत्रैः कुर्यात्॥ वरोप्यर्के तदुक्तमंत्रैरक्षतारोपणं कुर्यात्॥ ततो वरो गायत्र्यार्कसूत्रे
ण पंचकृत्वआवेष्ट्य तेन सूत्रेण वृत्सामेति मंत्रेण स्कंधे बध्नायात् ततवरः॥ आचार्यो वार्कस्याष्टदिक्षु कलशा
न्संस्थाप्य कलशकंठान्वस्त्रेण चावेष्ट्याहेरिद्रानिक्षिप्य सर्वत्रेदं विष्णुरिति विष्णुं संपूज्यार्कोत्तरेऽग्निप्रति
ष्ठाप्यान्वादद्यात्॥ अत्र प्रधानं बृहस्पतिमग्निवायुसूर्यप्रजापतिं वाज्येनेत्युक्त्वाज्यभागांते समो भिरांगिरस इति
बृहस्पतये हुत्वा यस्मै त्वा कामकामाय वयं सम्राज्यजामहे नमस्मभ्यं कामं मत्वाथेदं त्वं धृतं पिबेत्यग्नये च्यस्त
समस्तबाहूतीभिर्हुत्वा कर्मशेषं समापयेत्॥ ततो वरो मम प्रीतिकरेति मंत्रेणार्कं त्रिः प्रदक्षिणीकृ
त्य मया कृतमिदं कर्म स्थावरेषु जरापुणा॥ अर्कोपत्यानि नो देहि तत्सर्वं क्षंतुमर्हसीति॥ प्रार्थयेत्॥ ततः॥

गोतिसूक्तानिपठित्वाकेशेसूर्येविसर्जनाचार्योयोगयुग्मंयथाशक्तिभूयसीर्दत्वामानुषीपरिणेयेत॥विष्णुप्रतिमा
आचार्योवरंदत्वापुण्याहंवाचनंकुर्यात॥ततःपंचमेऽह्निपुनरर्केसूर्येपूर्ववत्कर्मपुण्याहंविसर्जमानुषीपरिणयेत॥
इतिदिनकरभट्टकृतेगोतिशास्त्रेकेविवाहप्रयोगः॥इदानींजन्मनक्षत्रतिथिद्वेषाद्विगोतिक॥मूल्यप्रयो
गोब्रूतेदिनकरःसुधीः॥२॥नत्राद्यैवकुर्गोत्यगत्वाद्वोमस्यप्रसवोनिधीयते॥प्रयोगपारिजातेगर्ग॥
पित्ररिष्टेसुतारिष्टेमात्रारिष्टेतथैवच॥पित्रारिष्टेपित्रनिष्टेसूचकनक्षत्रोद्भवे॥एवमन्येपि॥प्रा
यश्चित्तंतदाकुर्योन्नतद्दोषस्यशांतये॥पूर्वाश्चिनोर्गुरोर्मार्यमघाचित्रेद्वेमूलमे॥एषुरक्षसुजातस्यकु
र्योद्वोजननंतथा॥अत्रप्रायश्चित्तंमूलादिगोतिकेगोजननंचकुर्योदितिसमुच्चयोविधीयते॥अन्यथागो
जननस्यानिष्टनिरासार्थत्वेनमूलादिगोत्राविकल्पःस्यात॥नचाऽदृष्टार्थत्वात्समुच्चयः॥एकप्रकरणपाठ
धीतत्वाभावात॥अन्यथाक्षयादिनिरसनार्थकइंदीवरादेरपिसमुच्चयापत्तेः॥तत्रापिगोतिकांतरात्पू
र्वेवापश्चाद्वागोजननंकार्यं॥जन्मर्क्षेवाद्विजन्मर्क्षेशुभेऽह्निने॥कृत्वाभ्युदयिकंसर्वंगृह्यकारपूर्वंगोमयेने

पत्रिण्याद्यगृह्यंस्नानभागके॥पंकजकर्णिकायुक्तंरजोतिस्त्रेनचर्णकैः॥ह्रींहींस्त्रचविनिक्षेप्यथाविन्यासतः॥नवसूर्पेचतन्मध्येरक्तवस्त्रंप्रसारयेत॥स्थापयित्वाशिशुंतत्रपुनःसूत्रेणवेष्टयेत॥पाद्मुखंत
मकारंतिलगर्भंगतंशिशुं॥गोमुखेस्त्रीयित्वायपुनर्नालंतुगोमुखात॥शिशुमग्निगोमुखेस्त्रीयित्वे
त्यर्थः॥विष्णुर्योनीतिसूक्तेनगव्येनस्नापयेच्छिशुं॥गव्यंपंचगव्येत॥गवामंगेषुमंत्रेणगवामंगेषुमं
सूत्रेणेत॥गवामंगेषुमस्त्रेणेतिपाठः॥विष्णोःश्रेष्ठेतिमंत्रेणगोप्रसूतेनुवाकसूक्ताचार्यस्तूसमाहृय
पश्चान्मंत्रेरहस्नापयेत॥ज्योतिर्निबंधेतु॥आचार्यसूक्तसमाहृयपश्चान्मंत्रेरहस्नापयेत॥मातामघन्यमाग॥
स्थाशिशुमानीयतन्मुखात॥तन्मुखाद्गोमुखात॥ततःपित्रेतरद्यान्नतोमात्रेप्रदापयेत॥वस्त्रस्थाप्यपिता
यास्यपुत्रस्यमुखमीक्षते॥स्थाप्यनिष्कारणंगोमूत्रेगोमयंक्षीरंमधुसर्पिश्चसंयुते॥आपोहिष्ठादिभिर्मंत्रै
रभिषिंचेत्ततःशिशुं॥मूर्ध्निचाघ्रायतंपुत्रंतन्मंत्रेणातरत्पिता॥घ्रंगारंगास्समंचमिहरायाधिजायसे॥आ
त्मावैपुत्रनामासिसजीवशरदःशते॥तन्मंत्रेणगारंगारित्यनेनामूर्ध्निशिरवघ्रायतंशिशुस्थापयेन्नत॥पु

ण्याहं वाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः॥ अत्र स्वशाखोक्तमार्गेण पुण्याहवाचनं कुर्यादिति केचित्॥ पुण्या
हशब्दमात्रं वाचयेदित्यरे॥ दरिद्रायाथ विप्राय तां गामभ्यर्च्य दापयेत्॥ गोवस्त्रस्वर्णधान्यानि दद्यादर्कादि
तः क्रमात्॥ यथाशक्ति धनं दद्याद्ब्राह्मणेभ्यस्तदापिता॥ ततो होमं प्रकुर्वीत स्वस्वशाखोक्तमार्गतः॥ होम
संबंधमुल्लेखनादि॥ होमस्य वक्ष्यमाणत्वात्॥ उल्लेखनादिकं कृत्वा चाज्यभागांतमाचरेत्॥ होमस्येशान
दिग्भागे धान्योपरि शुभं घटं॥ होमस्य होमदेशस्य॥ पंचगव्यं घटे स्थाप्य तिमांस्तत्र विनिक्षिपेत्॥ क्षारद्रुम
कषायांश्च पंचरत्नानि निक्षिपेत्॥ कषायो निर्यासः॥ वस्त्रयुग्मेन संस्थाप्य गंधादिभिरथार्चयेत्॥ विष्णु
वरुणमभ्यर्च्य प्रतिमां च विधानतः॥ प्रतिमारूपं यत इंद्रादिभिर्मंत्रैः कुंभं स्पृश्याभिमंत्रयेत्॥ यत इंद्रेति
षड्रस्य ग्रहणं॥ आश्वलायनेन यत इंद्रं भयामह इति च सूत्रशेषमिति॥ षल्लृचस्य चोक्तत्वात्॥ दधिमध्वाज्य
युक्तेन होमं कुर्यात्प्रयत्नतः॥ युक्तमिति भावोक्तः॥ दधिमध्वाज्यानां योगेनेत्यर्थः॥ आपो हि ष्ठेति तिसृभिरप्सु मे सोम
इत्यथ॥ तद्विष्णोः परमं पदमक्षीभ्यामिति सूक्ततः॥ ऋग्भिराभिः प्रत्यृचं चाष्टविंशतिसंख्यया॥ अशक्तावष्टसंख्या

या॥ अशक्तावष्टसंख्यया दधिमध्वाज्यसंयुतं॥ आदित्यादिग्रहाणां च होमं कुर्यात्समंत्रकं॥ ग्रहाणां च होमं दधिम
ध्वाज्येनेत्यन्वयः॥ अन्यथा पुनर्दध्यादिग्रहणवैयर्थ्यापत्तेः॥ इति गोमुखप्रसवविधिः॥ अथ प्रयोगः॥ देशकालौ संकी
र्त्यास्य बालस्यामुकनक्षत्रोत्पत्तिसूचितारिष्टनिरसनद्वारा परमेश्वरप्रीत्यर्थं गोमुखप्रसवं करिष्य इति संकल्प्य
गणेशं संपूज्याचार्यं वृणुयात्॥ आचार्यः श्वेतवर्णपंकजमध्ये यथाशक्ति व्रीहिं निक्षिप्यते॥ षुशूर्पं निधाय शूर्पे
रक्तवस्त्रं प्रसार्य तिलान्विकीर्य प्राङ्मुखं शिशुं निधाय सूत्रेण शूर्पं वेष्टयित्वा शिशुसमीपे गोमुखनीयप्रसवं भा
वयित्वा विष्णुर्योनिमिति सूक्तेन मिलितेन पंचगव्येन॥ शिशुं स्नपयित्वा गवामंगेष्विति मंत्रेण गां॥ वामांगेषु
सर्वांगेषु वा स्पृशेत्॥ ततो विष्णोश्चेष्टेतेति शिशुमादाय मात्रे दद्यात्॥ मातापित्रे पितामात्रे दत्वा वस्त्रमयसार्यपु
त्रमुखमीक्षेत॥ तत आचार्यः शिशुं पंचगव्येन आपो हि ष्ठेति तिसृभिषिंचेत्॥ ततः पिता अंगादिति शिशुमूर्ध्नि त्रि
त्रिरवघ्राय मात्रे दत्वास्य गोमुखप्रसवकर्मणः पुण्याहं भवंतो ब्रुवंतु इत्युक्त्वा तान्वाचयित्वा गामाचार्याय दत्वा
ग्रहप्रीत्यर्थं प्रत्येकं गोवस्त्रस्वर्णधान्यानि दत्वा यथाशक्ति भूयसीं दक्षिणां दद्यात्॥ तत आचार्योग्निहोत्रप्रतिष्ठा

यात्वाधनेकुर्यात॥तत्रप्रधाने॥अपआपोहिष्ठेतितिसृभिःअग्नुमेइत्यनयाचपञ्चमयृचाताद्यविंशत्यं
क्वोभिःविप्लुतद्रिओशिरश्चातावतीभिःयस्मणामस्रीभ्यामितिसूक्तेनपञ्चर्चतावतीभिर्योह्यमावतीभिर्हिधि
मधुमतीकृतिभिःशोषणाभिष्टकृतमित्यादिआज्यमातेरूत्वायेरीशाभ्याकुमेमस्थाप्यतत्रपेचगव्यसिद्धान्नेश्रीह्री
रसीरुमकषायाअभिक्षिप्यवस्त्रयुग्मेनमस्थाप्यपूर्णपात्रोपरिततद्रिओप्रतिमातत्वायामीतिमावास्यायाश्चनि
र्वकुमेस्थाचस्मागामन्नावज्ञपेत॥यत्तइंद्रेतिपणाकएवपुनःपणाथइंद्रोवाद्रेप्रागाथेनद्वइ॥ततोभिक्षितं
हविर्मधाज्येहोमंकुर्यात॥तत्रमंत्रो॥आपोहिष्ठेतितिसृणामिधुद्वीपःआवरीषआपोगायत्रीअग्नुमेमेधा
तिथिरापोनुष्टुप्॥तद्रिओमेधातिथिर्विस्मुर्गायत्रीस्वाम्यंतइतिपणाविनियोयस्मैहानुष्टुप्पुरुषमिर्नचयहमंत्रै
र्घृतुत्वाकमेशेषंसमापयेत॥इतिगोमुखप्रसवप्रयोगः॥अथकुमारीचतुर्थीजातजातिःपरिजातेः॥गंगो गम॰
मेरश्मोसुरवासीनंगंगमुनिवरस्तुभे॥नमस्कृत्वानुयःपठेन्नरोमुनिपुंगवः॥गातिकर्मोगसंयोगान्व ६६
कृत्वःस्यात्पुरा॥अथुराद्योनमिल्लिंगमपस्त्वचतुर्थी॥शिवावायद्विवाराद्यैप्रसूतेःकिंफलंवद॥कुमार

स्त्वचतुर्थीमेमिलस्त्रीकृत्वप्रसूतेःफलंवदेत्यर्थःकुमारपक्षेचतुर्थ्याःप्रसूतेःषड्विधंफलं॥चतुर्थीचषष्ठीग
कुर्याद्रात्रौशुभेस्मृते॥द्वितीयेपितरंहंतित्रतीयेमातरंतथा॥चतुर्थेमानुषंहंतिपंचमेवंशनाशने॥षष्ठेधनह
निःस्यात्सप्तमेत्मनोवंशनाशने॥तस्मात्सर्वप्रयत्नेनशांतिकुर्याद्विधानतः॥अचार्योवरयेद्धीमान्पुत्रज्ञानसमन्वितं॥
सर्वसंस्कारसंयुक्तंसर्वलक्षणसंयुतं॥वृषभेसमासीमंवरद्वयपाणिनं॥शुद्धस्फटिकसंकाशंश्वेतमाल्या
बराचितं॥अग्नेकेनचुमंत्रेणपूजांकुर्याद्विधानतः॥स्थापयेच्चनुरःकुंभांश्चनुर्दिक्षुयथाविधि॥आग्नेयी
मारभस्थापने॥आग्नेयकुंभमारभ्यैशान्यंयेदर्शनात्॥पुण्यतीर्थजलोपेताधान्यस्योपरिविन्यसेत्॥तन्मध्येस्था
पयेत्कुंभंशातछिद्रसमन्वितः॥पंचमत्यंचरत्नानिपंचत्वकपंचपल्लवान्॥पंचधान्यंसुवर्णंचतन्मंत्रेविनिक्षिपे
त्॥शतोषधानिनिक्षिप्यश्वेतवस्त्रेणवेष्टयेत्॥सुरभीणिचपुष्पाणिश्वेतानिपरिवेष्टयेत्॥सर्वेसमुद्रासरित
स्तीर्थानिजलरूपानरः॥आयांतुयज्ञमानस्यदुरितक्षयकारकः॥आवाह्यकारुणैर्मंत्रैरनेनचविधानतः॥स्थ
मणोर्वारुणैर्वरुणंअनेनोक्तेनसमुद्रहीत्यर्थः॥इममेवरुणेत्यनयातत्वायामीत्यृचातथा॥त्वन्नोअग्नइत्य

नयासत्वन्नरतिमंत्रतः॥आग्नेयकुंडमारभ्यपूजांकुर्याद्यथाक्रमात्॥आनोभद्राक्रतवसूक्तंचभद्रंअग्नेअसूक्तंक॥
जस्वापुरुसूक्तंचषडुपचक्रमाज्ञयेत्॥ईश्वरस्याभिषेकंचयहपूजांचकारयेत्॥ईश्वरस्यपूर्वेस्थापितेश्वरप्रति
मायाऽसमर्थः॥पूजाहोमसुनिस्पत्तेहोमंकुर्याद्यानतः॥एहय्येगानहिग्नेकुंडंकुर्याद्विधानतः॥कुर्यादाघारपर्य
तंस्वएषोक्तविधानतः॥आघारांतत्वोक्तांचसुषीनइतिकेचित्॥समिद्दानंचरुंश्चेवतिलमाषाश्चमर्षपैः॥सा॰
हित्योक्तामर्षपाणांष्टथक्कृत्वा॥समिधोविशिनष्टि॥अश्वत्थप्लक्षपाकाद्यासमिद्भिःखादिरैःशुभैः॥अष्टोत्तर
सहस्रंवाअष्टोत्तरशतंतुवा॥अष्टाविंशतिमंतेश्चहोमंकुर्यात्तथाकृत्वा॥चरुंकेनैवमंत्रेणतिलानव्या
हृतिभिःक्रमात्॥ग्रहाराधंचहोतव्याअस्मदुक्तविधानतः॥एवंक्रमेणहोतव्यहोमशेषंसमापयेत्॥सर्व
संस्कारयुक्तानांचयागानामभिषेचने॥चयागानामातापित्रोश्चसाने॥चतुर्भिःकलशैरभिषेहत्कुंमसमन्वितं॥ राम॰
हेहत्कुंभःशतछिद्रःधौतांचराशिंघृत्वाथकुर्याद्राज्ञावलोकनं॥पूर्णाहुतिंचजुहुयाद्यजमानःसमाहितः॥त ई॰ख॰
मंत्रेपरयामन्मार्ईश्वरायमिंत्रेदयेत्॥सर्वसंस्कारसंयुक्तांस्वमाणंपयस्विनीं॥प्रतिमांवस्त्रयुग्मंचश्चांच

र्यायनिवेदयेत्॥ईश्वरप्रीतयेशांतांकुर्याद्ब्राह्मणभोजनं॥गवांयःकुरुतेशांतिंसर्वपापैःप्रमुच्यते॥इतिचतुर्थ
शीशांतिविधिः॥अथप्रयोगः॥नामकरणात्पूर्वंचूडाकर्मसंस्कारेचतुर्थेजन्मनक्षत्रितारीष्टनिर
मनक्षत्रायरमेश्वरप्रीत्यर्थेकुंभचतुर्थेशांतिकरिष्यइतिसंकल्पगणेशपूजापुण्याहवाचननांदिश्रा
धकाचार्यर्त्विग्वरणानिकुर्यात्॥षष्ठभागचतुर्थेनपादितीयतृतीयांशयोर्नरुद्रजपोगमुख्यप्रसवेपि॥ततआचार्य
ःमर्षपानिकीर्यभूमिंप्रोक्ष्याग्नेर्यामारभ्यविंशुचतुरःकुंभान्मध्येचशतछिद्रंकलशंन्यसेत्तस्मिन्पंचमृत्पंचप
ल्लवान्पंचरत्नानिपंचत्वक्पंचधान्यानिसुवर्णंशतौषधानिनिक्षिप्यत्रिभिर्वस्त्रैर्मौलाद्विभिश्चवेष्टयित्वापूर्ण
पात्रोपरिकूर्पतदर्धार्धकृतोरुप्रतिमांन्यसेत्कलशमिति संपूज्यसर्वेसमुद्राइतिकुंभमभिमंत्र्याग्नेयकलशेरममेव
रुणेतिनैर्ऋतेतत्वायामीतिवायव्येतत्वान्नोअग्नेतिईशानेसन्नइतिवरुणंसंपूज्याग्नेयादिकलशेषुनोमहाअ
ग्नेमहस्वशीर्षन्पुरुषेतिसूक्तानिक्रमेणजपेत्॥ततोग्निंहोत्रंप्रतिष्ठाप्यहुत्वा॥अत्रप्रधाने॥अवकृत्यहु
त्वप्लुत्यपासाशमभिघार्यजपेरुसर्षपयुततिलमाषैः॥प्रत्येकंशतसहस्रंवाशतंवाविंशतिमंत्रैर्हयज्ञोक्तेनेष्ट्या

नत्वमाषान्नेनबलिंहरेत्॥ पंचरात्राद्विषड्रोगो ह्यसिद्ध्यान्नरईश्वरः॥ योबलिंकुरुतेमर्त्यकुरोगीरोगात्प्रमुच्यते॥ आधान निधनपुत्रपौत्रजन्मार्कयोर्यदिपत्करः॥ नसचेज्जनितेव्याधौरूक्षंशांयमरणायच॥ अस्मेषाद्वाद्विपूर्वायमवरुणमरुद्वरुक्षत रानक्षाः सुर्कास्त्रयोरूक्षदरिद्रातिथिषुचरविज्ञारार्कवारेषुचरविज्ञारार्कवारेधुयेषांरोगाः संजायतेतयमपुरमचि रात्प्रयांतेवचंद्रजन्मभष्टास्त्यबंधुव्ययमक्षगतेमत्युलग्नेचरांशौ॥ ॥इतिस्निग्धरूक्षतेशांतिसारेव्याधिन क्षत्रशांतयः॥ अथज्वरशांतयः॥ मदनरत्ने॥ अग्नेयपोरूक्षनक्षत्रपरिघूने॥ अस्मिंमासेज्वरांत्यस्त्रिश्चेद्दृश्यहिनानिपीडा ॥ नीलोत्पलपुष्पैः पूजा॥ गुग्गुलुधूपः॥ क्षीरखंडुकनैवेद्यंदेयमित्येतिपूजामंत्रः॥ क्षीरवृक्षसमित्पक्षानद्व्यंगायज्ञाद्व ज्ञातेकृत्वाहनबलिंहरेत्॥ एकादृश्यहिनाद्वरमेपंचविंशतिदिनानेसुखीस्यात्॥ मरणंज्वरोत्पन्निश्चेत्तत्रूक्षसं होहोवागुग्गुलूपूर्यंनैवेद्यं॥ रूक्षसुरभिपुष्पं॥ महिषाक्षोधूपः॥ यंबकमितिपूजामंत्रः॥ घृतमधुतिलाहोमद्रव्यंगायज्ञ द्वोमरज्ञांतयमायनुकुर्यात्॥ एकविंशतिदिनांतेसुखीस्यात्॥ कृत्तिकायांज्वरश्चेन्नबहिनानिपीडा॥ घृतोदनंनै वेद्यं॥ यूथिकापुष्पपूजा॥ सर्षिर्धूपः॥ पुनर्वसोरेवजनाशंतिपूजामंत्रः॥ सर्वज्ञाद्वाद्वज्ञरज्ञांतेघृतंदध्योदनंचकृत्वा

हुतशेषेण बलिं दद्यात्॥ पंचदिनादारभ्य एकविंशतिदिनांते सुखी स्यात् रोहिण्यां ज्वरश्चेद्दिनानि त्रीणि नववापी-
डा॥ क्षीरान्नं नैवेद्यं॥ कमलपुष्पपूजा॥ सर्जरसो धूपः॥ नमो ब्रह्मण इति पूजामंत्रः॥ घृतं सर्वधान्यानि च होमद्रव्यं॥ सावि-
त्र्याष्टोत्तरशतं हुत्वा क्षीरान्नेन प्रजापतये बलिं दद्यात्॥ त्रिदिनादारभ्य नवदिनांते सुखी स्यात्॥ मृगशिरसि ज्वरश्चेत्पंचदिना-
निपीडा॥ पायसं नैवेद्यं॥ कुमुदोत्पलपुष्पपूजा॥ दशांगो धूपः॥ नवो नव इति पूजामंत्रः॥ मुद्गतिलपंचगव्यं होमद्रव्यं सा-
वित्र्याष्टोत्तरशतं हुत्वा मुद्गतिलैश्चंद्राय बलिं दद्यात्॥ पंचदिनादारभ्य नवदिनांते सुखी स्यात्॥ आर्द्रायां ज्वरश्चेन्मृ-
त्युर्दिनान्येकविंशत्पीडा॥ सोहालकं नैवेद्यं॥ धत्तूरपुष्पपूजा॥ अगरुर्धूपः॥ नमः शंभवेति पूजामंत्रः॥ मध्वाज्यं होमद्र-
व्यं॥ सावित्र्याष्टोत्तरशतं हुत्वा पायसान्नेन रुद्राय बलिं दद्यात्॥ पंचदिनादारभ्य दशदिनांते सुखी स्यात्॥ पुनर्वसौ ज्वर-
श्चेत्सप्तदिनानि पीडा॥ गुडोदनं नैवेद्यं मल्लिकापुष्पपूजा॥ मलयजो धूपः॥ अदितिर्द्यौरदितिरिति पूजामंत्रः॥ घृततंडुल-
द्रव्यं॥ गायत्र्याष्टोत्तरशतं हुत्वा अदितये गंधमाल्योदनैर्बलिं दद्यात्॥ सप्तदिनादारभ्य सप्तदशदिनांते सुखी स्यात्॥ पुष्ये ज्व-
रश्चेत्सप्तदिनानि पीडा॥ खंडमंडकान्नैवेद्यं॥ मल्लिकापुष्पं सरोरुहं च गुग्गुलुर्धूपः॥ बृहस्पते अतीरिति मंत्रः॥ घृतपायसं

द्रव्यं सावित्र्याष्टोत्तरशतं हुत्वा गंधमाल्योदनैर्बृहस्पतये बलिं दद्यात्॥ दिनत्रयादारभ्य सप्तदिनांते सुखी स्यात्॥ अश्ले-
षायां ज्वरश्चेन्नवदिनानि पीडा॥ पायसं नैवेद्यं॥ अतसीपुष्पपूजा॥ घृतडो धूपः॥ मधुवाता मंत्रः॥ दधिघृताक्तकृशरान्नं द्रव्यं
॥ गायत्र्याष्टोत्तरशतं हुत्वा सक्तून्नेन गायबलिं दद्यात्॥ न शांतिश्चेद्दशदिने मरणं स्यात्॥ मघायां ज्वरश्चेन्मृत्युः एकविंशति-
दिनानि पीडा॥ घृतपूरकं नैवेद्यं॥ चंपकपुष्पपूजा॥ गुग्गुलुर्धूपः॥ पितुन्नुस्तोषमिति मंत्रः॥ घृतमधुमिश्रतिलाक्षतवटप-
त्राणि द्रव्यं॥ सावित्र्याष्टोत्तरशतं हुत्वा घृततिलैः पितृभ्यो बलिं दद्यात्॥ न शांतिश्चेद्दशदिनांते मृत्युः॥ पूर्वायां ज्वरश्चेद्दि-
नानि षष्टिः पंचदशवा पीडा॥ रक्तमाल्योदनं नैवेद्यं॥ बिल्वफलं धूपः॥ अर्यमणं तु दंवमिति मंत्रः॥ घृतप्रियंगुद्रव्यं॥ सावित्र्या-
ष्टोत्तरशतं हुत्वा गंधपुष्पेण सूर्याय बलिं दद्यात्॥ षड्दिनादारभ्य अष्टदिनांते सुखी स्यात्॥ उत्तरायां ज्वरश्चेदेकविंशति-
दिनानि पीडा॥ कृशरं नैवेद्यं॥ श्वेतकरवीरपूजा॥ बिल्वफलं धूपः॥ यन्येति मंत्रः॥ तिलमाषसर्पिर्व्रीहियवद्रव्यं॥ सा-
वित्र्याष्टोत्तरशतं हुत्वा॥ तैरर्यम्णे बलिं दद्यात्॥ अष्टादशदिनादारभ्य एकविंशतिदिनांते ज्वरमोक्षः॥ हस्ते ज्वरश्चे-
न्मृत्युः संदेहो वा दिनानि पंचदश॥ अपूपं नैवेद्यं रक्तकरवीरपूजा॥ दशांगो धूपः॥ उद्धृत्यमिति मंत्रः॥ दधिघृतं द्रव्यं॥

सावित्र्याष्टोत्तरशतंकुङ्कुमागंधपुष्पाणांबलिंदद्यात्॥पंचदशाहिनाहारभ्रमणकविंशतिदिनोंतेसुखीस्यात्॥चित्रायो
ज्वरेऽह्निनिपंचपीडा॥मोदकंनैवेद्यं॥जयापुष्पपूजा॥इशांगोधूपः॥चित्रेरेवानामितिमंत्रः॥जलमिश्रेघृतेवि
ष्णुंदद्यात्॥सावित्र्याष्टोत्तरशतंकुङ्कुमाक्तंघृतमिश्रमुडदैर्बलिंदद्यात्॥समदिनाहारभ्रमविंशतिदिनोंतेसुखीस्या
त्॥स्वात्यांज्वरस्त्वेत्यहिदिनानिपीडा॥दध्योदनंनैवेद्यं॥रमनकपुष्पपूजा॥श्वेतागरुधूपः॥मनःपितेवेतिमंत्रः॥घृ
ताक्तयवदद्यात्॥सावित्र्याष्टोत्तरशतंकुङ्कुमागंधपुष्पावायवेबलिंदद्यात्॥दशाहिनाहारभ्रमचत्वारिंशद्दिनोंतेसुखीस्या
त्॥विशाखायांज्वरस्त्वेदिनातिदिनानिपीडा॥गुडौदनंनैवेद्यंधूकपुष्पपूजा॥देवदारुधूपः॥शान्नइंद्राग्नीतिपूजामंत्रः
॥दुग्धोदनंघृतदद्यात्॥सावित्र्याष्टोत्तरशतंकुङ्कुमापयोमिश्रान्नैर्गंधमाल्यैरिंद्राग्निभ्यांबलिंदद्यात्॥दशाहिनाहारभ्रमविंशति
दिनोंतेसुखीस्यात्॥अनुराधायांज्वरस्त्वेत्यमृत्युसंदेहोवा॥पंचदिनानिपीडा॥चित्रौदनंनैवेद्यं॥पद्मोत्पलीपुष्पपूजाभृङ्ग
राजधूपः॥इंद्रंवोइतिमंत्रः॥घृतसूरणकंदद्यात्॥सावित्र्याष्टोत्तरशतंकुङ्कुमागंधपुष्पैर्णाद्यबलिंदद्यात्॥न
ज्ञातिश्चेदमृतंगतिर्गतिमतीत्याद्यज्यायनोमांदद्यात्॥मूलेज्वरस्त्वेमृत्युसंदेहोवाहिनानिदशपीडा॥मत्स्यमांससुरा

यौलिकांनैवेद्यं॥रक्ताशोकपुष्पपूजा॥मेषश्रृंगोधूपः॥मोषुणःपराइतिमंत्रः॥मधूत्तंकंदमूलंदद्यात्॥सावित्र्याष्टो
त्तरशतंकुङ्कुमानिक्तंतथेपायसान्नेनबलिंदद्यात्॥पूर्वाषाढायांज्वरस्त्वेत्यंचविंशतिदिनांतेपीडा॥मंडकानैवेद्यं॥कर्क
टपुष्पपूजा॥मनःशिलाधूपः॥आपोहिष्ठेतिमंत्रः॥रक्तशालिंदद्यात्॥सावित्र्याष्टोत्तरशतंकुङ्कुमावरुणायष्ठीयपायसा
न्नेनबलिंदद्यात्॥चतुर्दशाहिनाहारभ्रमविंशतिदिनोंतेसुखीस्यात्॥उत्तराषाढायांज्वरस्त्वेदिंशतिदिनानिपीडा॥
पंचनक्तंनैवेद्यं॥पंचवर्णपुष्पैःपूजा॥लाक्षाधूपः॥विश्वेदेवासआगतेतिमंत्रः॥घृतेसक्तूकरंदद्यात्॥सा
वित्र्याष्टोत्तरशतंकुङ्कुमाविश्वेभ्योदेवेभ्यःपायसान्नेनबलिंदद्यात्॥एकादशाहिनाहारभ्रमविंशतिदिनोंतेसु
खीस्यात्॥श्रवणोदयस्त्वेन्मासद्वयंपीडासंदेहोवा॥रक्तार्कशकृतमंडकानैवेद्यं॥जातीपुष्पपूजा॥इशांगो
धूपः॥श्रयोदेवाइतिमंत्रः॥रक्ततंडुलंदद्यं॥सावित्र्याष्टोत्तरशतंकुङ्कुमागंधपुष्पैर्णाविष्णवेबलिंद
द्यात्॥मासांतेवत्सरांतेवासुखीस्यात्॥धनिष्ठायांज्वरस्त्वेंचदिनानिपीडा॥पायसंदद्यात्॥पं
चदिनाहारभ्रमपंचदिनाहारभ्रमविंशतिदिनोंतेसुखीस्यात्॥इतिहिंकरभट्टकृतशांतिसारेज्वरनक्षत्रशांति

तन्मंत्रैर्मुद्रिनास्थाप्यास्ततोहस्कृतैःसह॥सूतकांतेषुपुत्राद्येःकार्यंशांतिकमुत्कवत॥कांस्यपात्रेघृतंदद्यात्कुर्या
द्ब्राह्मणतर्पणं॥महनरत्नेगारुडे॥-ग्रहोक्त्वाधनिष्ठार्धमतन्नक्षत्रपंचकंरवंपंचसदादुष्यमशुभेदाहकर्मणि॥शवस्प
र्शमपीपशुस्नेहमयाःपुत्तलास्तदा॥दर्भमयास्तुचत्वारःकृष्णमंत्राभिमंत्रिताः॥ततोदाहःप्रकर्तव्यस्तत्रनक्षत्रके॥महासूतकांते
ततःपुत्रैःकार्योशांतिकपौष्टिकं॥पंचकेजीवोमतोयोवैनगतिस्मतेनरः॥तिलाश्चैवहिरण्यंचनमुष्टिंप्रपृतदद्यते॥तत्रैव
ब्रह्मपु॥धनिष्ठापंचकेजीवोमृतोयदिकथंचना॥त्रिपुष्करयामभवेत्कुलत्रयंमारयत्यवश्यंतद्दानविनाशार्थंविधानंस
मुदीर्यते॥दर्भेणप्रतिमाःकार्याःपंचौर्णासूत्रवेष्टिताः॥पंचपिष्टानुसिक्तास्तुमहत्यांबद्धदेवता॥प्रेतवाहःप्रेतसरःप्रे
तपःप्रेतसूमिपः॥प्रेतहर्त्रेपंचरुद्रनामन्येतानिचक्रमात॥-अत्रप्रतिमागंधमाल्यैरलंकृत्य॥प्रथमांशवस्यशिरसिद्वितीयां
योनेरधो॥स्तृतीयांवामकुक्षौ॥चतुर्थिनाभौ॥पंचमींपादयोर्न्यसेत्तदुपरितन्नामभिर्घृते॥कृत्वापुनर्घृतायसोमो॥अचकर्मि गरुड॰
तिमंत्रान्प्रतिकंतास्वाज्यंहुत्वारुद्रंतिमरान्सूतकांतेनतःपुत्रःकुर्याच्छांतिकपौष्टिकं॥कांस्यपात्रस्थितंतैलंवास्यदे २१५
द्वाह्मणनकर्मणे॥ब्रह्मविष्णुमहेशेद्रवरुणप्रीतयेनतः॥मापमुद्दयवव्रीहिप्रियंग्वादिप्रयच्छति॥स्वर्णरानेरुद्रजाप्यंतस्से

होमादिजाचेत्॥गोभूदानेपरंशांतंकुर्याद्धोमोपपद्यतेयः-प्रपरार्केपि॥धनिष्ठापंचकमतेपंचरत्नोत्तिलान्घृतं॥प्राप्याकु
नेरुद्रवयोमिति॥ततोनिर्हरणंकुर्यात्तत्रैषसाग्नेर्विधिःस्मृतः॥इतरस्मिन्नेरवज्ञेवाप्रतिपाद्यते॥नैवनीलंपंचरत्नंकेतु
रकंपद्मरागंचमौक्तिकं॥पंचरत्नमिदंप्रोक्तंमुनिभिःपूर्वदर्शिभिः॥रत्नानोवाप्यभावेतुस्तत्रैकंवाधमेववा॥सुवर्णंप्राप्य
मावेतुप्राज्ञेयंविप्रसंज्ञितं॥धनिष्ठायांविशेषमाह॥बौधायनः॥वासवेमरणेचस्याद्देहंवापिपुनर्मृतिः॥सुवर्णंरश्मि
र्णंद्याद्रुद्रंवस्त्रमथापिवा॥-अथत्रिपुष्करादिज्ञातिः॥मरनरत्नेगर्गः॥द्वित्रिपुष्करयोगेतुमृतिर्मृत्यंतरावहा॥द्वि
नेमरणेचैवत्रिगुणंस्यात्त्रिपुष्करे॥खननेप्लवनेवस्त्रादेतद्दोषपरायणं॥नरीरंतस्यकारयेत
॥शूर्पेनिधायालंकृत्यदाहयेत्तंतकोपरि॥दाहमंत्रमाह॥बौधायनः-अग्नावग्निमितिमंत्रेणातिलपिष्टंप्रदाहयेत॥द्वि
त्रिपुष्करयोर्दर्भत्रिभिःकुर्याच्छवंतथा॥दहनंमनोहरे॥गारुडे॥त्रिपुष्करेत्रयःकार्यादौपुत्तलौद्विपुष्करे॥मृतस्यचस
मंपिंडंस्थाप्यंपिष्टमयास्ततः॥कार्योदाहस्ततस्तार्क्ष्यसूतकांतेनतुनुशांतिकं॥कृत्वागाश्चहिरण्यंचदद्याद्दक्षश्चशक्ति
तः॥तत्रैवप्रेतखंडे॥त्रिपुष्करमतेदद्याद्धेनवंमूल्यमेववा॥द्विपुष्कर्क्षरेचगोयुग्मंततोदाहोनदोषकृत॥-अथत्रिपा

नयेवेकुंडद्वारेचत्रोषधिरूपकल्पयेत्॥पूर्वोक्तलक्षणोपेतंमेरव—वप्रसंयुतं॥तोरणद्वारसंयुक्तंवेदिकाप
रि॥—आशिषोवाचनंकुर्योन्नमःकुसुमकल्पपूर्वक॥रुद्रंविजोवरयेत्सप्तचतुर्विंशतिसंख्यकान्॥तेषांमध्येशिरसत्तम
माचार्यंतत्रकल्पयेत्॥मधुपर्कादिकंकृत्वातत्रकार्यंनियोजयेत॥ब्राह्मणानत्रचत्वारोहोतृकुंडेषुविनियोजयेत॥ब्र
ह्मपुजापकानष्टौषट्सख्यानगणायकान्॥गंधपुष्पादिकंकृत्वातत्रकार्यंप्रयोजयेत॥ब्रह्मणःपंचविप्रांश्चयोजयेच्च
यथाविधिः॥कारयेन्नुसुवर्णेनगजवक्त्रंचतुर्भुजं॥अक्षमालापरश्चान्नबीजदंडधरंकमात्॥वाहनायुधवर्णादिस
र्वंपाकथितंपुरा॥तन्मुखायविशेद्वक्त्रंचतुर्थ्यंतीर्मनुंवदेत्॥वामदेवऋषिःप्रोक्तःछंदोनुष्टुबुदाहृतं॥
पत्नीगजवक्त्रोमदेवता॥कुमारकंचतुर्थ्यंतंपूर्वोक्तद्रव्यसंयुतं॥सिंचेदष्टदलेपद्मेवेदिकातदुपरि॥गजवक्त्रकर्णि
कायांलोकपालान्दलेषुच॥गणेशायनमोमध्येपद्ममष्टदलेलिखेत्॥आदित्यादिग्रहान्तत्रपूजयेत्पूर्ववक्त्रमात्॥ग
णेशायनमोमध्येत्रिकोणमंडलंलिखेत्॥तत्राचंयेदष्टभुजोमहिषासुरमर्दिनीं॥गणेशायनमोमध्येवर्तुलंमंडलं
लिखेत्॥तत्राचंयेत्प्रयत्नेनचास्त्रिनीदेवतार्चयेत्॥ईशानंपूजयेदुद्यंडलंतेजसान्वितं॥आग्नेयंपूजयेद्विद्वां

मंडलंहारकात्मकं॥वेदात्मकंचनैरुत्यंपूजयेद्यत्नमंडलं॥वायव्यंपूजयेत्सम्यक्प्रणवात्मकं॥रुद्रंपुरुषसू
क्तेनचतुर्वेदशिरोमंत्रकैः॥प्रणवस्यऋषिश्छंदोदेवताकथितापुरा॥तन्नःसूर्योगंधपुष्पैर्वेस्त्वधूपैस्तथादीपकैः॥स
मस्तोपचाराणिरुक्त्वास्वैर्गजानने॥प्राकुंडंगजवक्त्रस्यपंचभूतात्मकंततः॥दुर्गाकुंडंप्रतीच्यांचतद्वत्कुंडंग्रहा
त्मकं॥तेस्वाग्निनकुंडंचयद्धोमादृतःपरं॥दिक्कुंडैर्दिक्षुदिक्कुंडैर्होमःकर्तव्यःस्वस्वमंत्रकैः॥स्वगृह्यविधिनाकुंड
स्थापयेच्चकृताशने॥मुखेनेस्वस्वकुंडेचजुहुयान्मुखाकृति॥पालाशसमिदाज्यान्नैःपृथगष्टोत्तरंशतं॥गृहमंत्रैःस
मिद्भिश्चहोमंपूर्ववदाचरेत्॥चतुर्दिक्षुचतुर्वेदपारायणपरान्द्विजान्॥अग्निर्मेवाचऋग्वेदःसूक्तैःकक्षार्चोपरान्यते॥ते
वेयविधिनान्नंचकुंडेभ्यःसमर्पयेत्॥नाश्नन्तिनतोदद्यात्शांतिवाचनपूर्वकं॥एकरात्रंत्रिरात्रंचनवरात्रमथा
पिवा॥अनेनविधिनाकुर्योदेकमुक्ताजितेंद्रियः॥तिलहोमंव्याहृतिभिःसहस्रंचाष्टसंयुतं॥एवंप्रतिदिनंसम्यक्कुर्या
द्विमिश्चयथापुरा॥संपूर्णेदिवसेकर्मकृत्वापूर्णाहुतिंततः॥मंत्रपूतोदकैःकर्मगजानामार्जयेत्ततः॥अभिषेकृत्य
पुनःसम्यक्गंधपुष्पादिभिस्तथा॥कुलगुरोर्वंततोदद्यादोपनायनिकंगुरौ॥होमशेषंसमाप्यजेद्गुरुंरुद्रंपुरुषसूक्तकं॥

पंचब्रह्मादिभिर्मंत्रैर्गजशालासुमार्जयेत्॥ गृहीत्वा सुकृतं तेभ्यो दक्षिणां चमर्चयेत्॥ आचार्याय ततो दद्यान्निष्काण
मेकं विंशतितद्॥ तदर्धमितरेभ्यश्च यजेच्छेषात्स्वशक्तितः॥ ब्राह्मणान्भोजयेद्व्यश्वान्स्वयं भुंजीत बंधुभिः॥ एवं यः
कुरुते सम्यग्गजशांतिं नृपोत्तम॥ सर्वान्कामानवाप्नोति गजवृद्धिं लभेत्तु सः॥ अथाश्वशांतिः॥ भूपतेर्यस्य त्वश्वाः सरा
वविजयी रणे॥ श्रीमान्स रावनन्तस्मात्कार्यमश्वाभिरक्षणं॥ सूर्यश्वारक्षसंपाते जायंते बहवो रुजः॥ यदा यदा
रुग्जननमश्वाभामथवा तदा॥ सलोकपालरेवतपूजां होमं च कारयेत्॥ भानुवारे च संक्रांतावयने विषुवद्वये॥
दिनक्षये व्यतीपाते द्वादश्यामश्वमेपि वा॥ ईशान्यामष्टभिर्हस्तैश्चतुर्भिर्वापि मंडपं॥ चतुर्द्वारं वितानस्रक्तोरणाद्यैरा
लंकृतं॥ तन्मध्ये वेदिकां तस्य पंचविंशतिमानतः॥ मंडपस्य बहिः कुंडं प्राच्यां पूर्वोक्तलक्षणं॥ वरयेत्पूर्ववद्विप्रान्स्व
स्तिवानपूर्वकं॥ सूर्यपुत्रं हयारूढं पंचवक्त्रं दशांबकं॥ रक्तवर्णं कशां खड्गं रेवंतं द्विभुजं स्मरेत्॥ सूर्यपुत्र नमस्तेस्तु न
मस्ते पंचवक्त्रकं॥ नमो गंधर्वदेवाय रेवंताय नमो नमः॥ मंत्रेणानेन रेवंतं गंधवस्त्राक्षतादिभिः॥ विधिवद्वेदिकामध्ये तं
दुलोपरि पूजयेत्॥ परितः स्वस्वमंत्रैस्तान्लोकपालांश्च पूजयेत्॥ प्राग्देवकशां खड्गं रेवंतस्य समीपतः॥ ऋग्वेदादि

चतुर्वेदान्जपेद्द्वारेषु पूर्ववत्॥ पूर्णकुंभान्रक्तवर्णान्गंधवस्त्राद्यलंकृतान्॥ पंचत्वक्पल्लवोपेतानष्टमृद्भिः सु
संपुतान्॥ द्वारेषु स्थाप्य चाल्लिंगमंत्रैः कार्यं समर्चनं॥ रेवतपूजामाचार्यः कृत्वा गृह्य विधानतः॥ स्थापयेत्तं व्याहृतिभि
स्तस्मिन्कुंडे हुताशनं ततस्तत्राज्यभागेन च॥ पलाशसमिदाज्यान्नैः पृथगष्टोत्तरं शतं॥ आचार्यो जुहुयाद्व्रीहिं तिला
न्व्याहृतिभिस्ततः॥ एकरात्रं त्रिरात्रं वा नवरात्रमथापि वा॥ अनेन विधिना कुर्यादेकभक्तो जितेंद्रियः॥ जपादिपूर्वकं सम्यक्
र्त्ता पूर्णाहुतिं हुनेत्॥ ततो मांगल्यघोषैश्च नैवेद्यं च समर्पयेत्॥ ततस्तद्धुतशेषेण सह कुंभोदकेन च॥ प्रदक्षिणं व्रजंत्यश्वान्
सुप्रीतो बलिमुत्तमं॥ जीमूतस्येत्यनूवाकान्चतुरो दिक्षु निक्षिपेत्॥ आचार्याय ततो दद्याद्दक्षिणां गोचतुष्टयं॥ तदर्धं वा तदर्धं वा य
थावित्तानुसारतः॥ ब्राह्मणेभ्यो जापकेभ्यस्त्वाचार्यार्द्धं प्रदापयेत्॥ ब्राह्मणान्भोजयेत्पश्चाच्छांतिवाचनपूर्वकं॥ एवं यः कुरुते सम्य
क्अश्वशांतिं सनुत्तमां॥ मुच्यंते सर्वरोगेभ्यो वर्द्धंते नात्र संशयः॥ इत्यश्वशांतिः॥ अथ गजंती राजन उत्पलं परिमलं शौनकः॥ नव
म्यामाश्वयुजि कार्त्तिक्यामथवापि च॥ हस्तिना राजनं कुर्याद्राजागसमृद्धये॥ प्रागुदक्प्रवणे देशे विशाले सुमनोरमे॥ पूर्वस्यामुत्त
रस्यां वा नगरस्य बहिर्दिशि॥ पंचशद्धस्तनिर्माणं देशं प्रोक्ष्य वारिणा॥ तन्मध्ये तोरणं कुर्याद्वनस्पतिमयं शुभं॥ स्योना पृथिवीत्य

नयास्थापितेसुरहसमं॥ षोडशारत्निमुत्सेधादिस्तारेणतदर्धके॥मनुनिरस्तरश्लिष्टंवस्त्रयुग्मविभूषितं॥उद्धायस्वे
तिमंत्रेणमंत्रोस्यपरिनोजनेः॥अमैश्चैवाखिलैर्मंत्रैर्गंधपुष्पैस्तथार्चयेत॥कोणस्तंभयोर्वेदीहिरण्यंकारयेद्यथा॥
फलपुष्पस्तवकैश्चसप्तपर्णैर्घटयेत्ततः॥होमंतद्दक्षिणेकुर्यात्समाहितमनागरुं॥कुंडेवास्थंडिलेवाथयज्ञंतेचैवकल्पयेत्॥पू
र्णंकुंभंतदर्धेरुविसमेधान्यराशिषुतिष्ठावास्थंडिलेपात्रान्पूजयेद्वस्त्रमास्पके॥यज्ञायतच्चस्रुक्नेत्रंतच्चनुरुवा
तेहृतं॥मृधुच्छ्रस्रुवाघेनस्रुक्नाज्याधंजेन्नतः॥स्रोवीहित्यादिस्रुक्नेनयाम्यहोमंततःपरं॥एवंकृत्वानुविधिवन्निरूपंनुरु
माहृतं॥यच्चिदितेतिस्रुक्नेनजुरुयाद्रुरुणायवा॥आवायवितिस्रुक्नेनयज्ञेदायुसमाहितः॥त्वंसोमप्रतिस्रुक्नेनसोमायं
जुरुयाद्विः॥पश्चाद्दोंडशकान्मैनरुडमिंद्वायथाक्रमं॥अनोभद्रयस्रुक्नेनहोमंतेषुसमापयेत्॥वरुरुणायैवमि
द्वायमधुतापयमातथा॥पश्चात्सिरुक्तंकृत्वाबसितेभ्यःसमाहरेत॥दुर्गांसाराधयविधिवद्दग्नौपूर्वोस्तरस्त्वयं॥कृत्व राम०
काश्चसमभ्यर्चयेद्वस्त्राभरणामास्यकैः॥हिरण्यकुसुमेसिंहीमन्नाचापराजिते॥एभिर्यश्चीतनोबाद्यैर्वीमुत्सवसमन्वि १२३
तां॥कुष्टंचरनपद्मानिनखदामगुरुणिच॥पश्चिमेकुंभसौवर्णेतीर्थतोयंप्रपूजयेत्॥गंधाधिपेगणाध्यक्षेवप्रोक्षयेत्

त्रवारिणा॥आपोहिष्ठेतिस्रुक्नेनस्थस्तिवाच्ययथाविधि॥गजमारोप्यराजानंतोरणात्तंतरेगुरुः॥स्वस्त्रीत्रेयंजपेन्म
त्रविःकृत्वानुप्रदक्षिणं॥प्रस्थापयेत्प्रभुंतंनगजेंद्रेणद्विजोत्तमः॥पार्श्वतोदीप्यमानासुवर्दीपिकासुवर्दीपकैः॥सारोहा
साहिनःसर्वेगछेत्पुरुषएवहत॥पुण्यंसामगानासुस्वास्तंतसुविसृजंतान॥सामात्मोमंत्रसहितःप्रविशेन्मंदिरं
नृपः॥ब्राह्मणान्भोजयित्वानुगुरवेदक्षिणांततः॥हस्तिनंगांहिरण्यंचवस्त्रमाल्यानुलेपनं॥दद्यान्नृपःस्वयंतस्मै
यस्यगामरणानिच॥एवंनीराजनाद्राजासर्वान्कामानवाप्नुयात्॥रिनिर्गतंकागजाःसर्वेनविघ्नंतिनंसंशयः
॥अथाश्वनीराजनंच॥तत्रैवोक्तं॥अश्वनीराजनंवक्ष्येश्वानांहितकाम्यया॥तद्वच्चवाश्वापुष्टाग्निपूर्वंपक्षेन
योत्तमः॥कारयित्वाश्वशालासुहोमशालासमंस्कृते॥प्रत्यूषेस्नापयित्वाश्वानसम्यक्तीर्थजलाशये॥समाहृ
कारयेद्धोमरक्षोवधानुरंगमान॥स्थंडिलाद्धोमभागांतयजनंचैवकल्पयेत॥ब्राह्मणांसोहकानकुंभान्चचतुर्हि
सुमहौषधीन्॥विल्वंविल्वंविल्वंविद्याधान्येषुतेद्यतान्यक्षिपेन्नतः॥अथगोशांतिः॥मरनरक्षेत्रेविसु
धर्मे॥अतःपरंप्रवक्ष्यामिकर्मनैमित्तिकंतव॥धेनूनांमरकेप्राप्ते॥तथागोगजकपट्टवे॥क्षीरक्षयेतथायस्मि

नेप्रकृतेस्तुविपर्यये॥द्विराचोपोषितोविप्रानएकराचोपवीतीपिवा॥गवांमध्येशुभेदेशेस्वस्तिलेग्निप्रकल्प
येत॥अष्टपत्रेसमेस्थंडेकर्णिकाकेसरान्विते॥पूजयेत्कर्णिकामध्येवासुदेवंश्रियासह॥केसरेपूजनंकार्
येदेवतानांयथाक्रमं॥यासांनुप्रस्थामितवनामानिभागैर्व॥मुनदेवीनामदेवीमनुपूर्वंभागैसमर्चयेत॥पूजनीय
स्ततोब्रह्मासुरभिस्तदनंतरं॥ततःसूर्यस्ततोधेनुर्वरूथाद्विजोत्तम॥ततस्तुष्टिपृथिवीदेवीततोनंतंनुपूजयेत॥
ततःसंरविविश्वरूपास्त्वाहृद्येतेतदनंतरं॥ततःसिद्धितोऋद्धितःस्मृतिंसमर्चयेत॥गौरिमीनामहृद्येनुस्तथा
नःपूजयाद्विजोत्तम॥ततश्चेदमसंदेवमहादेवंततः॥महादेवंततोदेवीपूजयेत्ततदनंतरं॥इत्येतादेवताःप्रो
क्ताःकेसरेचैवषोडश॥पत्रेषुपूजनीयास्तुदिग्मात्रास्तुतथादिशे॥गंधमाल्यान्नसंस्कारधूपदीपान्नसंपदा॥
पृत्येकंपूजयेद्भक्तःप्रयतोद्विजः॥पूर्णकुंभास्त्रयस्तत्रसर्वोसांप्रत्येकंविनिवेदयेत॥मंत्रस्तुगितवत्कार्योवर्धमानं रा॰मा॰
पुनर्दुग्धैःसहिरण्येयान्नकिस्तोहोमंसमाचरेत॥वेदिंकृत्वायथान्यायंस्थंडिलंचकुतान्नरः॥कोणेकोणेकोटवतार १२५
संसमुद्दिश्ययथाविधि॥चतुर्थ्यंतेननामानुधर्मान्कुर्यात्क्रमात॥होमस्तुदंतधावेनप्रत्येकंनुक्रयाक्रमात्॥ततो

रक्षोहणेमंत्रेनुकुर्याद्धोरसर्षपात॥ततःसमाप्यदेवानांक्रियांकर्मसमाचरेत॥सुवर्णंचतथाकांस्यंधेनुवस्त्रयुगंतथा॥
कर्त्रेदेयंमुपदेष्टेवस्त्रयुग्मंसुमंत्रतया॥भोजनंगोरसप्रायंब्राह्मणेभ्योन्नमोजयेत॥स्वस्तिवाच्यंततःपश्चाद्दत्त्वाशय
वेद्विजः॥दक्षोहणेस्तथामंत्रैःकुर्युस्तेऽक्षणंगवां॥गवांचपूजाकर्त्रेयागंधमाल्यानुलेपनैः॥कर्त्रेयान्यत्तथावस्त्रंयथाक्र
मंद्विजोत्तम॥शांतिकर्मगवामेतत्समाख्यातंप्रशांतये॥॥अथकाकमैथुनस्त्रीनशांतिः॥श्वेतकाकमैथुनस्त्रीनमेवानि
ष्टावहं॥काकोमैथुनयुक्तश्चेत्श्वेतःसपरिदृश्यते॥इतिहेमाद्रौगरुडेकल्पे॥नारदसंहितायां॥दिवावायदिवारात्रौयः
पश्यत्काकमैथुनं॥सनरोमृत्युमाप्नोतियदिवास्त्रीननारभेत्॥तद्दोषशमनायोयंशांतिकर्मसमाचरेत॥गृहस्थस्तान
मागेतुहोमस्थानंप्रकल्पयेत॥स्वगृह्योक्तविधानेनतत्रस्थाप्यकृताशनं॥प्रतिमंत्रंयवैकैकंजपमन्युदयेनवा॥या
हुतिमिर्विहितैस्तैस्तैर्जपांतेप्रकल्पयेत॥पूर्णाहुतिंचनुर्यात्कर्त्रोश्चिरसंकृतः॥स्वर्णशृंगीरौप्यखुरीलक्ष्मोर्ध
नुपयस्विनी॥वस्त्रालंकारसहितांनिष्कद्वादशसंयुतां॥तद्धेनंतद्धेनंतद्धेनंवायुतां॥यथाविभानुसारेण॥
नन्यूनाधिककल्पना॥प्राचार्यायश्रोत्रियायतां॥दद्यात्कुशंविने॥ब्राह्मणेभ्योविशिष्टेभ्योयथाशक्त्याचदक्षिणां॥

ब्राह्मणान्भोजयेत्पश्चात्स्वस्तिवाचनपूर्वकं॥एवंयःकुरुतेसम्यक्सूतदोषात्प्रमुच्यते॥अद्भुतसागरेगर्गः॥
काकस्यमैथुनेपश्येत्काकःशिरसिचेद्द्विजेत॥शिरस्युद्भसिवाकुर्यात्तप्तशस्त्रघातनंवैतथा॥विहारणंचकुर्
तेशयानेचस्वप्नेद्यद्दि॥तद्गवेदनुमरणंमहारिष्टमथापिवा॥महाराजेयज्ञकाकोवासतेहनुनाविना॥त
द्गृहारिष्टमाचष्टेयामारिष्टमथापिवा॥ज्ञातितत्रप्रकुर्वीतविधानेनयथोदितं॥उद्दिश्यारिष्टशमनंकुर्या
न्नैकल्पमादितः॥शुचौदेशेरत्निमात्रेस्थंडिलेग्निंनिधायच॥नदीशानेचाष्टहस्तेकलशोपरिशोभितः॥द्वि
रण्यनिर्मितंत्विंद्रंलोकपालसमन्वितं॥पूजयित्वास्वशाखोक्तविधिनाग्रपयेच्चरुं॥कृताज्यभागपर्यं
तंजुहुयात्कर्मनोहविः॥पालाग्नीःसमिधोव्रीहीश्चरुमान्ममितिक्रमात॥अष्टोत्तरसहस्रंवाअष्टोत्तरशं
तंवुवा॥यतइंद्रेतिमंत्रेणलोकपालेमणेवच॥शान्नाकृत्वास्कंदंस्वरंलोकप्रायश्चित्ताकृतीर्जुहेत॥लोक
पालंविसर्ज्यत्वाइंद्राग्नेचरुंशेषतः॥वायसेभ्योबलिंदद्यात्तेइंद्वारुणमंत्रतः॥पूर्णाहुतिंततोहुत्वाआचार्यंपूज
येत्ततः॥कुंभोदकेनाभिषेकंयजमानस्यविस्तरात॥आचार्योयंइतिमंत्रंद्यात्सोपस्करंततः॥शान्नाचभू

यसीदद्यातद्विजानांभोजनंहिशेत॥अन्नंतद्दर्थवाशक्त्याहेतदभावेदशापिवा॥सर्वेशांतिंपाठयित्वागत्वीमच्चद्विजा
शिषः॥एवंकृतेभवेच्छांतिःकाकारिष्टविनाशनी॥मानवसंहितायां॥अथतःसंप्रवक्ष्यामिवायसःप्रविशेद्गृहं॥प्रवे
शद्वारतोगच्छन्मासमेकंविवर्जयेत॥द्वारांतरेयद्यगच्छेत्षण्मासान्स्कंदविवर्जयेत॥स्वास्वयंविशेच्चैवशीघ्रमत्युरु
गंभवेत॥देवराज॥देवासयेनरपाणांवुयामनाशंभवीष्यति॥गृहंप्रवेशनेकाकोगृहाशोषस्वयंकरः॥स्थानमाजो
रतोगच्छद्यायसःप्रविशेद्गृहं॥गृहस्थमरणंविद्यात्सर्वनाशंगृहंभवेत॥एतेषांदोषजातानांशांतिंवक्ष्येसमासतः
॥प्रवेशस्थानदेशेषुदक्षिणेवागृहान्ततः॥गोमयेनोपलिप्येस्थंडिलेसमलंकृते॥आचार्यंवरयेत्पश्चाद्ब्राह्मणंवे
दपारगं॥व्रीहिद्रोणंचसुस्नातंस्थापयेद्व्रणंघटं॥पंचपल्लवसंयुक्तंपंचगव्यसमन्वितं॥पंचरत्नसमायुक्तं
पूरयेत्तीर्थवारिणा॥नस्योपरिसमत्पात्रंकांकरुपंशचीपतिः॥कूर्मपात्रसुवर्णेनपादेनाथस्वशक्तितः॥प्रति
मांपूजयेत्पश्चात्तत्रयुग्मंनिवेदयेत॥यतइंद्रेतिमंत्रेणार्चयित्वानुदेवतं॥इंद्राद्दीशानपर्यंतमर्चयेल्लो
कपालकान्क्रमात्॥कुंभाभिमंत्रणंकुर्यात्सौरुंचस्मरेन्नयेत॥स्वगृह्योक्तेनविधिनाहोमकर्मसमाचरेत॥य

तेरेइति मंत्रान्तेसमिद्राज्यचरुंतकुर्यात्॥ अष्टोत्तरसहस्रंवाअष्टोत्तरशतंवा॥ वैश्यंबकेनमंत्रेणतिलान्तेन
त्रंकुर्यात्॥ इदंविष्णुमंत्रेणलाजाहोमंसमाचरेत्॥ उपहोमंततःकृत्वामहाव्याहृतिभिःकुर्यात्॥ इंद्रायस्वाहा॥
वायसोमायतशमनायस्वाहा॥ शांतायस्वाहेति॥ ततःस्विष्टकृतंकृत्वाहोमशेषंसमापयेत्॥ सपात्रैर्भिक्षु
स्कगोयुग्मंदक्षिणांदद्यात्॥ आज्यावलोकनंकृत्वामहाशांतिंपठेत्ततः॥ इतिवायसशांतिः॥ अथपद्मीसर
शांतिः॥ वसिष्ठसंहितायां॥ कुंडेनेमस्तकाद्यंगेपतीतेफलमुच्यते॥ मस्तकेराज्यलाभःस्याद्भालेकर्णेचभू
षणं॥ नेत्रयोर्मित्रलाभस्यात्सुगंधनासिकोपरि॥ वक्त्रेसुभोजनंकंठेस्त्रीलाभस्कंधयोर्जयः॥ उरसेनेत्रविवर्द्धिः
स्यादर्थवृद्धिःकरद्वये॥ वक्षस्थलेनुसौभाग्यंहृदिप्रीतिविवर्द्धनं॥ पुत्रलाभेनकुक्षौस्याद्गोकीर्त्तिविवर्द्धनं॥ उ
र्वोर्लाभस्तथोरुभ्यांजानुभ्यांसद्गतिर्भवेत्॥ पादतश्चोर्ध्वगमनंकुर्याद्रामस्तकाघ्रिं॥ गात्रेप्रदक्षिं रा॰ १२६
सहरागमः॥ कटिस्थानेवस्त्रलाभोगुह्यस्थानेसमागमः॥ गुदेरोगोविनाशःस्याद्गुरुज्ञात्वोऽश्ववाहनंजंघयो
पादयोश्चैवसद्गतनमादिशेत्॥ पादतश्चोर्ध्वगमनंकुर्याद्रामस्तकाघ्रिं॥ गात्रेप्रदक्षिणंवापिराज्य

लाभोभवेन्नरः॥ मस्तकात्पादपर्यंतंयद्दिगछेच्चुकुद्यतः॥ गाद्यप्रदक्षिणंवापिहानिशोकंसमाद्दिशेत्॥ सर्व
दीपतनेहानिःसर्वांगेषुचसर्वदा॥ ऊर्ध्वंगछेदधोगछेत्कसमुत्कंभाग्यभंगः॥ शीर्षराज्यंश्रियोवासिलाभेत्वैश्वर्य
वर्धनं॥ सव्येभुजेनयःप्रोक्षेद्घपसव्येमहद्भयं॥ कुक्षेर्दक्षिणभागेतुधनलाभस्तथैवच॥ वामकुक्षौतुनिधनंग
दितंपूर्वसूरिभिः॥ सव्यहस्तेभिषेकोवामहस्तेतुनिस्वता॥ उदरेसर्वभानुसुपुत्रवासिरुच्यते॥ वामभागेम
हारोगःकट्यांसव्येमहद्यशः॥ वामकट्यांतुनिधनंमनिमित्तंत्वदर्शिभिः॥ जानोरेवविजानीयात्सव्यपादेतुभावदं॥
वामपादेतुगमनंस्त्रीणांस्यात्फलंवदेत्॥ फलंप्ररोहणेचैवसरटस्यप्रचारतः॥ सर्वांगेषुशुभंविद्याच्छांति
कुर्यात्स्वशक्तितः॥ शुभस्थानेषुभावामिरशुभेदोषशांतये॥ नस्वरूपंसुवर्णेनरुद्ररूपंतथैवच॥ सूत्रैःकुर्यो
न्नामन्मंत्रुंजयेनमंत्रेणवस्त्रहिरण्यादिभिरर्चयेत्॥ अग्नितश्चप्रतिष्ठाप्यनुकुर्यान्निलपायसैः॥ आचार्योवरुणैः
सूत्रैःकुर्यान्नामाभिषेचने॥ आज्यावलोकनंकृत्वाशक्त्यान्नाल्लणभोजनं॥ गणेशसेचयासार्कदुर्गाशीर्षणंग
हेवतां॥ तासांपीत्वैजपःकार्यःशेषंपूर्ववदाचरेत्॥ ऋत्विग्भ्योदक्षिणंदद्यात्सोऽशोभःस्वशक्तितः॥ इति

स्थिनकरभद्रकृतेशांतिसारोद्धारेपञ्चमःसरटशांतिः॥तत्रैव॥सारोहयेद्हंयस्यकपोतोवाप्रवेशयेत्॥स्नानहानिर्भवे
न्नस्ययज्ञानर्थपरंपरा॥होमायधनिनोगृहेद्दरिद्राणांशिवायच॥तच्छांतिस्तुकर्त्तव्याज्ञयहोमविधानतः॥ब्रह्मणा
न्वरयेन्नत्रस्वस्तिवाचनपूर्वकं॥षोडशाद्यारभ्याष्टोवाश्रोतस्मार्त्तक्रियापराः॥शेषाःकपोतइत्यादिकृत्वाग्नि:स्था
पंचाभिर्जपेत्॥कुंडंकृत्वाप्रयत्नेनस्वगृह्योक्तविधानतः॥ईशानमंत्रकेणेष्ट्वाघृतंहुत्वातथोत्तरतः॥प्रत्येकंस
मिद्भ्यान्नैःप्रतिप्रणवपूर्वकं॥यतइंद्रभयामहेस्वस्तिहेतिमंत्रकैः॥चित्तिंमेचित्तंजुहुयाच्चित्तंब्राह्मणेभ्यः
स्वतिभिःसह॥जयादीश्चघृतेनाज्यंकर्त्तव्यापूर्णाहुतिस्त्वयं॥विप्रेभ्योदक्षिणांदद्याद्दीपशांतिततोजपेत्॥
ब्रह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतबंधुभिः॥एवंयःकुरुतेभक्त्यातस्माद्दोषात्प्रमुच्यते॥पिंगजस्प
स्वरेप्येवंमधुवल्मीकयोरपि॥संपूर्णमंदिरद्वारेहनिःशून्यसभनिमंगले॥प्रकरिषुपुरद्वारेप्रासादा॥ राम॰
द्येषुविधिषु॥नत्रकलशंयामपस्थेवसीम्निसीमाधियस्यच॥शांतिकर्मीखिलंकार्यपूर्वोक्तेनक्रमेणतु॥इतिशि १२७
नकरभद्रकृतेशांतिसारेकपोतपिंगलाद्रिशांतिः॥अथकृत्याशांतिः॥शौनकोहंप्रवक्ष्यामिकृत्याशांति

धिद्विजन्मनां॥कुर्यात्स्वजन्मनक्षत्रेमासेमासेसमाहितः॥सुस्नातोनवंवस्त्रंमाल्याद्यसमलंकृतः॥
द्विजाग्रेःस्वस्तिवाच्योच्चैरग्निमिर्वेदपारगैः॥ससंस्कृतेसुप्रदेशेपरेणानवलोकने॥अथाज्यभागपर्यं
तंयज्ञतंत्रंप्रकल्पयेत्॥उपसेपनप्रभृतिंजुहुत्वायंचरुं॥याकल्पयन्निसूक्तेनजुहोम्यग्नौद्विजेनपुनः॥
इंद्रस्तवेतिसूक्तेनजुहुयाच्चघृताहुतिं॥ततःस्विष्टकृत्प्रभृतिहोमशेषंसमापयेत्॥शांत्यर्थंहस्तिगाद्याब्राह्म
णांश्चैवभोजयेत्॥जपैर्हवनांतिसूक्तानियतात्मानुसमाहितः॥प्रत्यृगग्निमकल्पेनसद्यःसंप्रतिबाधते॥अथ
ज्ञानिहंधएवाहिशांतिः॥वेश्मस्थेष्वादिदग्धेषुवैघनेनाग्निनायदि॥तेषांशांतिंप्रवक्ष्यामिशौनकोहंद्विजन्मनां
॥तस्मिन्नरेवोनानुमार्गंनैरुत्यावा॥स्तस्मिनुशीपालमवकांचैवनिधायस्वस्तिवाचयेत्॥कर्त्तास्यप
स्मिमेदेशेहोमंकुर्याच्चसाग्निः॥इध्मा—नाद्यिपर्यंतंयज्ञतंत्रंप्रकल्पयेत्॥उपसेपादिकंसर्वंहुत्वाज्य
भागयोः॥आज्याहुतीःशतवतीर्जुहुयादग्निमग्रतः॥सप्तत्यंतिसूक्तेनजुहुयाच्चचरुंतत॥स्विष्टकृ
त्प्रभृतिहोमशेषंसमापयेत्॥अग्नेरुत्तरतःस्थित्वास्वस्त्यात्रेयंजपेन्नरः॥ब्राह्मणांभोजयेन्नत्रयथाशा

किंचदक्षिणा॥तदग्निदग्धवपुषेप्रदद्याद्ब्राह्मणायच॥प्राणदग्धेषुसर्वेषुहिरण्यदक्षिणामवेत्॥अथानुक्तं
नयः॥उत्पातउपसर्गश्चदुर्दृतेचेतिपर्यायाः॥तत्रसर्गवमिश्रसंहितायां॥अमत्वंप्रकृतेर्यत्रदृश्यावुत्पातसंज्ञ
कः॥अथमेतत्स्वमत्याद्यनास्तिकादतिलोभनः॥अनाचाचरणान्नित्यमुपसर्गःप्रजायते॥तद्देहस्तत्रचैवाद्दि
व्यांतरिक्षक्षितिजाविकारघोररूपिणः॥यद्दृष्टाःकेतवश्चउत्पातास्त्र्यंगसंज्ञकाः॥निर्घातपरिवेषोल्कापुरंद
रधनुर्ध्वजाः॥एवमाद्यामहोत्पाताःदांतरिक्षाकृयाःस्मृताः॥उत्पद्यतेक्षितौयच्चस्थावरंवाथजंगमं॥तद्देकेदृशि
केभौमउत्पातःपरिकीर्त्तितः॥भौमास्फुल्लकफलदृश्यांतरिक्षास्तुमध्यमाः॥संपूर्णफलदाद्दिव्यावर्षोदधोनद
र्धतः॥अथकेतुफलं॥वमिश्रसंहितायां॥केतोरुदयस्तमयज्ञानुगणिनाचैवनराकृतेयस्मात्॥दिव्यांतरिक्षभौ
मस्तस्मात्त्रिविधाश्चकेतवोजगति॥एकोनरशतमेदास्तुपतेवासदस्यमेदास्ते॥औत्पातिकरूपत्वात्तमवेतिव
स्तथैकोवा॥दिविक्षयहजास्तेदिव्याख्याःकेतवोमहाफलदाः॥परिवेषेंद्रधनुरुल्कागंधर्वनगराणिचनिर्घा
तंगगनविकारजमेतत्॥मध्यमफलदंतथांतरिक्षंच॥भूमिभवाभौमाःस्फुरश्मिरावस्फुलंभावये

चानेधमफलाराशंपांकथयामिफलानिरूपाणि॥वर्षैर्मासैःपक्षैःक्रमशःपरिपाकमुपयांति॥स्निग्धःप्रस
न्नरूपःशुक्लानिभोरुस्वरदवत्सोम्यः॥उदयास्तमयेवंसुमिस्रसौम्यावहःकेतुः॥धूमनिभोधूम्यःकेतुर्दी
प्तप्रदोभवति॥इंद्रशरासनरूपःस्फुलिंगनिभोवर्षभीतिदःसम्मतः॥बहुभिःशिखिभिरनुलाविधुन्मणिहारहर्मनि
भाः॥अपरेदिवौकसांरूपामहाहवेनदृगीशानां॥शुकमुखबंधूकनिभावह्निसुताःसतडित्सन्निभारुक्षाः॥दृश्यंतेय
द्यनलदिशिभावंतस्तेपिशिखिभयदाः॥मृत्युसुतावक्रशिखाःरूक्षारूक्षाःप्रहरणाकाराः॥दृश्यंतेयाम्यापोजनभ
यकृद्भयप्रदालेपिःस्थितिनयादात्रिंशद्दर्शनसदृशास्मरश्मयोविशिखाः॥सुदयद्यास्मन्निरस्कायमतनयाम्
सुदाश्चशनिनिभाः॥शशितनयाःकुसुमनिभाःकुंदेंदुक्षीररजतनिभाः॥उत्तरभागेत्रिविधोजंतूनांतमुभिस्रकराः॥
त्रिशिखश्चित्रवर्णःशुक्लोब्रह्मसुतोब्रह्मदंडिनः॥अभियनदिकूप्रभवोसोशनिकरोब्रह्मदंडाख्यः॥शशितनयास्त्र
यस्ताः शुक्लारुजवश्चषट्संख्याः दृश्यंतेदिविदिनैःशुभरामासैश्चरुग्रयदाःजीवसुताविकचाख्याः शुक्लास्ता
स्त्रिस्निग्धाः॥याम्यायांदिशिसंस्थाबहवस्तेपारवाःसमंते॥बुधतनयाश्चोरव्याःशुक्लास्त्र्यश्चयथेष्टदिकूप्र

मया॥ग्रामयभयरः सतनेनेनूनोपेचपेचाशतकुज्ञातनयाः केकेयासनाज्ञानस्त्रसन्निभाः स्त्रिशूलधराःयाम्या
योहिशिसंख्यासुरूपशः एषदिसंख्याकाः॥तामसकीलकेसंज्ञाराक्षसुताः सूर्यमंडलेदृष्टाः॥तेषांतन्निमित्तेषफ
लंसम्यक्कथितंचसूर्यचारेपिग्रहसुतास्वाग्नेय्यांविज्ञाय्यधिकाश्चशतंसंख्याकाः॥प्रलयानलसदृग्भानु
विवह्निप्रदास्तेपि॥प्ररुणारुण्याः रुपामतिभाः॥शुक्रसुताविविधारूपेसंकीर्णाः॥शस्त्रसुद्रयहस्तेससोन्नरससं
तिग्रसंख्याकाः॥हरुकसंज्ञाग्राह्योतारासदृग्भाप्रज्ञापतयस्तेनया॥॥ग्रचत्वारिंशोन्नरशताधिकाःपायहाविधारः
सुताःवरुणभवार्कसंख्याद्वात्रिंशद्देशगुल्मषष्टिनिभाः शशिवत्स्वभासमेनाराजाग्नत्वेप्रकुर्वेति।कालभवाःषण्ण
वतीसंख्यास्तेषांकबंधनिभाः॥नन्नामानः शिखिनःपुद्गलयमीनिशजगतःविमलास्तारकारादृग्दिक्समुद्भवा
शिखिनः॥एएवंसहस्रमेद्दाःपायाश्चैषांविशेषमभिनिशजगतः॥विमलास्तारस्रादिसुसमुद्भवाःशिखिनः
एवंसहस्रमेद्दाःयापाश्चैषांविशेषमभिध्यास्ये॥पश्चिमदिशिसंभूतश्चोत्तरनम्रश्चसौम्यकेतुःसंकरुतेसु
निसमनुसंमितवर्णोसोमहास्विग्धः॥दक्षिणनम्रःप्राग्वातविधोयाम्यकेतुःसः।रूक्षःसुद्रयरायीमरकमर्य

याकरोत्येव॥धूम्रनिभोयाम्यायाकपालकेतुरेहसुदुस्निग्धःदिक्षुविदिक्षुप्रभवःसुन्मरकाहिरोगकरःप्राच्यादि
शिसंभूतःप्रदक्षिणोन्नमतिचक्रवद्भूत्वा॥सचचक्रकेतुरनिशंकपालकेतोश्चतुष्फल॥पश्चिमतःसंभूतोयाम्यादि
शोन्नमतिचाप्रदक्षिणेण॥धूम्रनिभोविषमाख्यःकेतुर्भूभारमपनयति॥कतिपयदिवसंगत्वागमननिवृत्तिकरोधूम्र
निभः॥नरपतिकुलहानिंगतःकरोतिविलंबयंसचक्राख्य॥गगनत्रिभागदीप्तः॥रुणनिभोसोमहासत्कारःकेतुर्व
क्रगतिकुरुतेक्रमशोजगतस्त्रिभागहरः॥गतिरहितोध्रुवकेतुःप्रमाणवर्णाकृतिर्नभवेत्॥ग्रहनक्षत्रोपगमेस्थि
तेवाशुभप्रदःकेतुरुपकरणपुरराज्ञामुरगहतरुपर्वतेषुसदनेपुदर्शनमुपैतिपतितेविनाभंचनियमेन॥कुमुदनि
भःकुमुदाख्योदिक्षभैःषड्भिस्कपश्चिमेदृष्टः॥प्रागुत्तरदिशिर्यस्यासुनिसमनुसंकरोत्येव॥जलधारेवहिरुत्वीनत्या
शिस्यापरणादृष्टःसःजलकेतुर्नक्षसदृशःसुनिसरस्कसर्वजनत्रो॥हरितागुलनिभोवर्भवेत्केतुःकचसन्नि
भोवापि॥बहुरोगभयंकुरुतेसर्पाकारस्कतद्भयदः॥ग्रपरोपिपद्मकेतुःपद्मनिभःपद्मगर्भसकाशःक्षेमकरोर
घनीनांसुनिसदृशःसर्वजनानां॥ग्रवर्तकेतुरयंप्रादक्षिणेणनदीसिमानश्चुक्रःसुमरोव्यत्ययकेस्कुलाभयभीति

भुनेचनदृक्कनपविनाशने॥अवशेषदिनेवैद्योदिशिरश्मामवहिरे॥अवनीगादमिछन्नेप्रतिकूलेधनुर्दये॥न
पीतरूपहिमवेदानुकूल्येचुतछुभे॥अथनिघातेवायुनानिहतोवायुर्गनात्यततिसितो॥यदाहिमःसगुरुतःसनिघोतो
तिशेषरूतः॥अथरज्ञ॥सितेनरजसाछिन्नाहिग्मामवनपर्वता॥यदातदाभवेत्येतेतिधनंयातिभूमिपाः॥धूमोऽनवस्तूयस्या
वेतस्याहिशिविनाशने॥रूतावस्यचशिशिरोग्रंपूर्णफलंहरजः॥अथभूपकः॥भूमारुविन्नगोऽशेषविग्रामसंभवः॥भूरं
पः सोपिजगतांसुभायभवेन्नृहा॥यामक्रमेणभूकंपाहिज्ञातीनामनिष्टदाः॥अनिष्टदाःस्त्रितीज्ञानांमध्योऽभयोर
पि॥प्रायेणनिखिलोत्पाताःस्त्रितीज्ञानामनिष्टदाः॥षड्भिर्मासैश्चभूकंपोदाम्नोहरःफलप्रदः॥अनुक्तापंचमिर्मासैस्तदानं
फलेहरजः॥अथग्रहयुद्धं॥अद्भुतसागरेगर्गः॥छादनेरोधनेचैवरश्मिशोधनयेवच॥अपसव्यग्रहाणांचचतुर्धायुद्धमु
च्यते॥इहेमौमाहीनामेवनसूर्यचंद्रयोः॥तारायाणांग्रहाणांपंचानांयुद्धमुक्तानियोगतः॥इत्युपसंहारतः॥यदाज्ञ
यसंज्ञाणांचतंचैव॥ग्रहोग्रहसमागम्यसमीभवतियोभृशं॥हानिप्राप्नोतिचयत्कंम्लेच्छमुकुरुमुंड्रकः॥ता
फलंविस्तरभीतेनोच्यते॥अथसामान्यज्ञानिरुच॥विशेषानुक्तेः॥अथप्रतिसूर्ये॥तत्रैवमयूरचित्रे॥उद्दीप्त

मानःसूर्योवेहरूपेनप्रतिरूपकः॥चीरपट्टानिभंवेन्नृणांमासार्धेननसंशयः॥अन्यापिसाधारणाशांतिः॥अथर
श्मिहरः॥वराहसंहितायां॥रविकिरणाजलदमरुतोसंघातोहरुवज्झितोहरुः॥सविहिद्भुखोपाणामशु
भोहिस्नुहिज्ञानांच॥अथाहिग्रहः॥अद्भुतसारेबृहत्संहितायां॥यदास्तमिनआदित्येवह्निर्ज्वालपरंरुते॥स्निग्धारुह
नुतंविद्याद्दितिभागेवभाषितं॥नारदसंहितायां॥दिग्दाहःपीतवर्णश्चेत्तीक्ष्णानांभयप्रदः॥अथछायाः॥तत्रैवमार्क
विरजस्करोवैवयदाछायानरुपते॥रुपतेनुप्रतीयावतदारुशभयंवदेत्॥अन्यामिकफलपाकः॥अनुक्तफल
कालत्वा॥अथमेघगर्भोपघातः॥तत्रैवरुर्कनिकाया॥गर्भोपघातसिमान्युल्कानिर्भूमिकंपनिर्घाताग्रहयुद्धरुक्ष
शशिनोर्नेशपुरोवारोवापि॥तत्रैवबृहत्संहितायां॥रुधिरादिदृष्टिरुक्तमथवेंद्रधनुर्निर्घातोवा॥इत्युपातैरेते
र्विविधैश्चमेहतोगर्भः॥अथाद्भुतपाककालः॥अद्भुतसारे॥पराशरः॥तत्रैवातफलेरिष्टंपूर्णेवर्षविपच्यते॥शो
र्तरिक्षंतथाभौममासैःषड्भिरुक्तमन्तुभिः॥निर्घातरुल्कविग्रहोसंगेधर्वनगराणिच॥अग्निवासमरात्रेणमासे
नोल्काविपच्यते॥पुरंचैत्यादिभंगेषुपुरयक्षमणेषुच॥नरेंद्रध्वजनंगेषुफलंमासाद्विपच्यते॥शांतिःस्वरुप

जातानां पाकः षण्मासिको भवेत्॥ अरिष्टः पच्यते यस्तु मासेषु फलहंतिषु॥ अतिहर्षातिशोकश्च सद्य एव विपच्य
ते॥ कीटमूषकसर्पाणां मूषकादिषु यत्फलं॥ पच्यते तद्विमासेन मधुसप्तसु पच्यते॥ हयानां हस्तिनां चैव शकुनं च शु
नस्तथा॥ सस्त्र्यहाद्वा नियतमुलूकस्य तथैव च॥ विदेहवाकसंश्रवणं दर्शनं यक्षरक्षसां॥ पशूनां विकृतं यच्च षष्ठे मासि
विपच्यते॥ मांसतैलविकारेषु देहांगस्पंदनेषु च॥ वस्त्रजातिविकारेषु फलं स्यात्सप्तमेहनि॥ चित्रकर्माणि मासा
भ्यां शयने षष्ठमासिकं॥ वल्मीकेषु स्तु मासेषु क्षये वृद्धे तथा त्रिषु॥ जयोच्छ्रये च भंगेषु यज्ञकर्मणि वैकृ
ते॥ सोमध्वजविकारे च विकाराः सप्तमासिकाः॥ तंतुबीजविकारेषु राज्ञः शस्त्री च जृंभने॥ पद्मोत्पलफलादीनां फ
लं षण्मासिकं भवेत्॥ विनाशे निःफलं तेषां पाककाले निवर्त्तते॥ तत्रैव गर्गः॥ पक्षाद्विपाकः सूर्यस्यापाकः सोमस्य मा
सिकः॥ मासद्वये स्मृतो राहोर्विपाके नात्र संशयः॥ त्रिभिर्मासैर्विपाकस्तु नियतधूमकेतवः॥ संवत्सरविपाकौ तु
ज्ञेयौ सूर्यबृहस्पती॥ षण्मासिकश्चौशनसः सूर्यजस्य तु पंचभिः॥ त्रिभिर्मासैस्तु भौमस्य उल्कापातस्तु मासिकः॥
अष्टभिर्भूमिकंपस्तु निर्घातः पच्यते त्रिभिः॥ अनार्तवं पुष्पफलं षड्भिर्मासैर्विपच्यते॥ पक्षिकीटपतंगानां दशाहा

त्फलमादिशेत्॥ घृततैलवसावर्षे सद्यः फलमुदाहृतं॥ अरिष्टं षड्भिर्मासेषु पच्यते कलहं त्रिषु॥ हिरण्यविक्रियायां
तु फलं मासाद्विपच्यते॥ कलहार्थविपर्यासे उत्सवक्रियया सह॥ अबलानां च चलने षण्मासात्फलमादिशेत्॥ मूषि
काकीटसर्पाणां मक्षिकानां तथैव च॥ दशनित्वतिमात्रेण फलं त्रैमासिकं भवेत्॥ रात्राविंदुधनुर्दृष्ट्वा राज्ञः शीलविप
र्ययं॥ वानराणां नराणां च तथैव गजवाजिनां॥ नानावादिशब्दानां फलं मासाद्विपच्यते॥ गृध्रगोमायुसिंहानां फलं मा
साद्विपच्यते॥ विडालनकुलानां च वराहव्याघ्रयोस्तथा॥ श्रुत्वांतरिक्षे शेषे तु फलं मासाद्विपच्यते॥ मात्स्ये विष्णुध
र्मोत्तरे च॥ अद्भुते तु समुत्पन्ने यदि वृष्टिं शिवा भवेत्॥ सप्ताहान्यंतरे ज्ञेयमद्भुतं निःफलं भवेत्॥ शिवा निर्विकाराः॥
अथाद्भुतफलस्थानानि॥ अद्भुतसागरे पराशरः॥ राज्ञः शरीरे लोके च पुरदारपुरोहिते॥ पाकमायाति पुत्रेषु तथा कोशे च
वाहने॥ तत्रैव गर्गः॥ पुरे तनपदे कोशे वाहने च पुरोहिते॥ पुत्रे स्वामिनि भृत्ये च पच्यते दैवमष्टधा॥ वसिष्ठसंहितायां॥ भौ
मं शांत्या शमं याति मार्दवं त्वंतरिक्षजं॥ दिव्यं होमान्नगोभूमिदानैस्तत्कोटिहोमतः॥ महोपहारा द्रुद्रस्य गोदोत्तरं पुरःसुरं
॥ अलंकृते क्षितितले यावत्क्षीरप्लवं भवेत्॥ अपि दिव्यं शमं याति किं पुनस्त्वितरद्वयं॥ अत्राधिकारी तत्रैव॥ अ

कृत्वा शांतिकं राजदुःखांभोधौ निमज्जति॥ अश्वेरोमंथाष्टवर्षादिरजोदर्शनात्तु तत्स्वामिनोधिकारः॥ केचित्त्वत्रापि रा
ज्ञोधिकारमाहुः॥ अथवा सर्वाद्भुतशांतिषु सर्वेषामधिकारः॥ अद्भुतसारे॥ ये तेषु शांतिं कुर्वंति न ते यांति पराभवं
॥ ये तु न प्रतिकुर्वंति क्रियमाणश्रद्धयान्विताः॥ नास्तिक्याद्वा विमोहाद्वा विनश्यंत्येव ते चिरादिति गर्गोक्तेः॥ अश्वादिकं
च दत्वा शांतिं कार्या॥ वृक्षोत्पातेछेदनमाह॥ नारदः॥ अकाले पुष्पिता वृक्षा दृश्यंते फलिता यदि॥ कार्यं तच्छेदनं तत्र
ततः शांतिर्मनीषिभिः॥ अथोत्पातसाधारणशांतिः॥ ॥ अथाद्भुतानां सर्वेषां शांतिं वक्ष्यामि शौनक॥ आश्चर्यमद्भुत
पश्येल्लक्षणेन समन्वितं॥ दिव्यानि चांतरिक्षाणि भौमानीत्यवराणि च॥ रश्मिहीनं रविं पश्येद्रवेः छिद्रं च भेदनं॥ नक्ष
त्रचंद्रसूर्याणां लक्षणं च पृथक् पृथक्॥ गंधर्वनगरं चापि दिवा नक्षत्रदर्शनं॥ एवमादीनि दिव्यानि अथ भावाद्भु
तानि च॥ अथांतरिक्षाण्येतानि अद्भुतानि निबोधन॥ गगने नोहितं पश्येत् महोल्कापतनं तथा॥ अमेघां विद्युतं
पश्येन्न च मेघे तु विद्युतां॥ अश्मेष्टकसुवर्णानां वर्षणं जलकाष्ठयोः॥ अन्यग्नौ धूममाकाशे रजः मुक्तां च दीपिकां॥ गं
धर्वगेयं शृणुयाद्दीर्घघोषं च निस्वनं॥ अथ भौमानि वक्ष्यामि निदर्शनविवक्षया॥ भूमेकं पंचदिग्दाहं ज्वलनं च नि

रिंधनं॥ मधुनः सिक्थकं चैव गृहे यस्य प्रजायते॥ सूणायां मुकुलं भार्यामौ गौर्जनयेद्यदि॥ मंडूकं तेस्वस्तनं गौः पिबेद्य
दि॥ शुनको गृह्यमारोहेत्प्रविशेद्वा शिवापुरं॥ शुनकाकपोतानां दृश्यते मैथुनं दि॥ दृश्यते मर्कटास्कंदो दुग्धे गौरुधि
रं यदि॥ एवमादीन्यद्भुतानि पार्थिवानि बहूनि च॥ एतेषां प्रशमार्थं यद्धोमं कुर्याद्द्विजातिभिः॥ अथाज्यभागपर्यंतं य
ज्ञतंत्रं प्रकल्पयेत्॥ उल्लेषनप्रभृतिभिर्जुहुयात्पायसं हविः॥ अननः शोशुचदघं सूक्तेन त्यृचं ततः॥ यदंतिवच्च दूरक
इत्यृचा दशकं ततः॥ यत्र ब्रह्मा पवमान इत्यृचां षट्कमेव च॥ उध्वयंतमस्य रीत्यादित्प्रयत्नस्यारेतसः॥ देवा
ः कपोत इत्येतत्कपोवेशने भवेत्॥ ततः स्विष्टकृदारभ्य होमशेषं समापयेत्॥ वासो हिरण्यरत्नं च गां दद्या
द्दक्षिणां ततः॥ ब्राह्मणान् भोजयेत्तत्र कारयेत्स्वस्तिवाचनं॥ वसिष्ठसंहितायां॥ हस्तैः षोडशभिः का
र्यं चतुरस्रं समंततः॥ मंडपं यज्ञियैर्वृक्षैरथवा वनदारुभिः॥ हस्तैश्चतुर्भिस्तन्मध्ये कुंडं कार्यं समंततः॥ समं
ततश्चतुर्भिरित्यन्वयः॥ तथा च क्षेत्रफलेन षोडशहस्तं कुंडं॥ खातं हस्तैश्चतुर्भिश्च वप्रत्रयसमन्वितं॥ षडंगुलो
न्नतस्त्वाद्यो द्वादशांगुलविस्तृतः॥ दशांगुलोन्नतो मध्य अष्टांगुलसुविस्तृतः॥ चतुर्दशांगुलोत्सेधश्चतुरंगुलविस्तृ

नः॥तृतीयवः प्रकर्तव्यो निश्चैकानुपश्चिमे॥चतुर्हस्तगुणैर्ईषद्वोन्नतायोऽङ्गगुलैः॥ह्रीनाधिकानकर्तव्या विस्तारः
षड्भिरङ्गुलैः॥कुरुस्यसप्तगुणत्वेवंकोटिहोमेतुसर्वदा॥इत्थाम्यावेदिकाकार्यासार्धहस्तप्रमाणतः॥उन्नताविस्तृता
कार्यापाग्दक्षप्रवणाशुभाः॥सर्वंहवमयीत्वाद्यशिवपूजापुरःसरं॥ग्रहास्तानर्चयेन्नत्वपूर्वोक्तविधि
नाततः॥पलाशसमिदाज्यानैर्मुरवातेरथोरथकृ॥अघोरमंत्रेणततोग्रहहोमंवकारयेत्॥तिल
होमंव्याहृतिभिर्घृताक्तंजुहुयान्नतः॥शरयुजापकैःस्वस्ववेदशाखयणक्रमात्॥चमकेनमकसूक्तै
रुरुद्रोक्तागजापकैः॥होमनवनिधिरावर्तैःकारयेत्क्रत्वृणैःसह॥नैवेद्यंनंनतःपश्चाच्छांतिवाचनपूर्वकं॥
ब्रह्मणान्भोजयेत्पश्चात्॥स्वयंभुंजीतवेधुभिः॥शिवविप्रोःकथाभीपर्हिनशेषेनयेन्नतः॥एवंयावत्कोटिहोमा
स्तावत्कार्यमतंद्रितैः॥तद्दशैवातदर्धंवासप्तहोममथापिवा॥कार्यंदोषानुसारेणविज्ञाद्यविवर्जि—।होमंतेद्र
व्यिणंदद्याच्चनुर्विंशतिरूपिजः॥प्रतिद्विजमलंकारंसार्धंनिष्कशतद्वयं॥तद्दशैवातद्दशैवाद्यंवित्तानुसारतः॥ग्र
हसाधारणंशांतिरुद्रपाताभिधः परः॥उत्पाताश्चैवतच्छांतिर्वेस्पतेत्वरथकृत्थकृ॥नारदसंहितायां॥इत्वालयो

त्सवंगेहवाद्यशालायांपूर्ववेतोपिवा॥कुंडंलक्षणसंयुक्तंकल्पयेन्मेखलायुतं॥खलायुते॥ग्रहोक्तविधिनाचस्थापयेच्छु
ताशने॥जुहुयाद्राज्यभागांतेरथगस्तान्नरंशते॥यतरुद्रमयामहेस्वस्तिरघोरमंत्रकैः॥समिदाज्यचरुव्याहृतिभि
स्तथा॥कोटिहोमेतदर्धंवासप्तहोममथापिवा॥यथाविज्ञानुसारेणनमूनाधिकंकल्पना॥एकविंशतिरात्रंवापंच
ाद्यर्धमेववा॥पंचरात्रंत्रिरात्रंवाहोमकर्मसमाचरेत्॥दक्षिणांचततोदद्याद्दाचार्यायकुटुंबिने॥गणेशंसेचपालांकेदुर्गां
क्षेत्रपंगदेक्षनाः॥नासांप्रीमैजपःकार्यःशेषंपूर्ववदाचरेत्॥ऋत्विप्रोदक्षिणांदद्यात्यांश्चोमःस्वशक्तितः॥ब्रह्मुत
सारेगर्गः॥सार्विशालसहोमंऋभैरवविशारदः॥गांभूमिंचहिरण्यंचधामंवस्त्रंतथैवच॥दद्याच्चगुरवेयाम
घेनुंवासोपुरानथा॥अलंकारंचविविधैःप्रीतयेप्रीतमानसः॥अन्नेनविधिनाभौममद्भुतंशमयेद्गुरुः॥एषएवविधि
र्नेम्यंतरिक्षाद्भुतेषुच॥विशेषोवनुसार्विशालसंहोमयेत॥होमसमाहितमताःकुर्याच्चधनकंबलं॥धेनूना
मादशेदद्यच्चनुर्विंशतिनिष्कसमायुतं॥गुरवेदीयमानंनुशमयेत्स्वराद्भुतं॥दिव्याद्भुतेषुकर्तव्यःकोटिहोमःसमाहितैः
॥गोसहस्रंचदातव्यंगुरवेदक्षिणाविधौ॥एषप्रोक्तोविधिःसम्यक्कुर्याद्रिष्टविघातकरः॥कोटिहोमाशकंचैव॥अस्य

फलदिव्योत्पाते॥ अमृताख्या महाशांतिः कर्त्तव्या॥ अद्भुतसारे॥ प्रयतस्तेषु सर्वेषु दिव्येष्वद्भुतकेष्वपि॥ महाशां
तिबुधः कुर्यादमृतां विश्वभेषजामिति गर्गोक्ते॥ ॥ अथर्वमुनिश्च॥ अद्भुतेष्वपि सर्वेषु त्रिविधेषु न सं
शयः॥ दिव्यांतरिक्षभौमेषु अमृता संसिता बुधैः॥ विष्णुधर्मोत्तरे॥ सर्वोत्पातप्रशमना अमृता चाभया स्मृता
॥ इति श्रीदिनकरभट्टकृतो शांतिसारे॥ उत्पातसामान्यशांति॥ मदनरत्ने॥ मात्स्ये॥ दिव्यांतरिक्षभौमेषु शांति
रत्राभिधीयते॥ विशेषेणानुभौमेषु शांतिः कार्या तथा भवेत्॥ अभयाचांतरिक्षेषु सौम्या दिव्येषु पार्थिव॥ वि
गिजिगीषुः परान् राजन्॥ भूतकामश्च यो भवेत्॥ विजिहीर्षुः परानेवं अभियुक्तस्तथा परैः॥ तथाभिचार
शंकायां शत्रूणामपि नाशने॥ भये महति वा प्राप्ते अभया शांतिरिष्यते॥ राजयक्ष्माभिभूतस्य क्षयक्षीणस्य
चाप्यथ॥ सौम्यां प्रशस्यते शांतिं यज्ञकामस्य चाप्यथ॥ भूवायेप्यसमुत्पन्ने प्राप्ते वा लक्षये तथा॥ अतिवृष्ट्या
मनावृष्ट्यां शलभाखुभये तथा॥ प्रसक्तेषु च चौरेषु वैष्णवी शांतिरिष्यते॥ पशूनां मरके प्राप्ते नराणामपि
दारुणे॥ भूतेषु दृश्यमानेषु रौद्री शांतिस्तथेष्यते॥ वेदनाशे समुत्पन्ने जननाशे च नास्तिके॥ अपूज्यपूजने जाते

ब्राह्मी शांतिस्तथेष्यते॥ भविष्यत्यभिषेके च परचक्रभयेषु च॥ स्वराष्ट्रभेदे च शांतिमाहवेन प्रशस्यते॥ अहातिरिक्तप
वने रूक्षे सर्वादिगुत्थिते॥ वैकृते व्याधिवाते च वायव्यां शांतिरिष्यते॥ अभिशापभये प्राप्ते भार्गवी स्यात्तथैव च॥ जाते
प्रसवे वैकृत्ये प्राजापत्या महाभुजा॥ उपस्कराणां वैकृत्ये त्वाष्ट्री पार्थिवनंदन॥ बालानां शांतिकामस्य कौमारी च तथा
नृप॥ आग्नेयीं कारयेच्छांतिं संप्राप्ते वह्निवैकृते॥ आज्ञाभंगे तथा जाते जाते भृत्यादिसंक्षये॥ अश्वानां शांतिकामस्य तद्वि
कारे तथोत्थिते॥ आश्वान्कामयमानस्य गांधर्वी शांतिरिष्यते॥ जातानां शांतिकामस्य शांतिरांगिरसी मता॥ पिशाचादि
भये जाता नैरृती शांतिरुच्यते॥ अयमृत्युभये जाते दुःस्वप्नेपि महाभुजा॥ याम्यां तु कारयेच्छांतिं संप्राप्ते मकरे तथा॥ धनना
शे समुत्पन्ने कौबेरी शांतिरिष्यते॥ वृक्षाणां तु तथार्चानां वैकृते समुपस्थिते॥ भूमिकंपे तथा शांतिः पार्थिवीं संप्रयोजयेत्
॥ प्रथमे दिनयामे तु रात्र्यां वा मनुजोत्तम॥ प्रथमे याम इति रात्र्यापि संबध्यते॥ एवमुत्तरत्रापि॥ हस्ते स्यात्सांच चित्राया
मादित्ये चाश्विने तथा॥ आर्यम्णसौम्यजातेषु वायव्यात्वद्भुतेषु च॥ द्वितीये दिनयामे तु रात्रौ च रविनंदन॥
पुष्याग्नेयविशाखास्वपित्र्याजभरणीषु च॥ उत्पाताये तथा भा आर्जपूर्वाभाद्रपदा॥ उत्पाताये तथा भाग्ये

ओमेयंतिषुकारयेत्॥भाग्येपूर्वासु॥ततीयेहिनयामेनुराशेचरविनेस्त॥रोहिणेवेस्ववीब्राह्मेचास॰
वेस्वहेवते॥ज्येष्ठायांचतथामेत्रेयेभवंत्यद्भुताःक्वचित्॥एहितेषुप्रयोक्तव्याशांतिविकुर्वतोहह॥चतुर्थेहि
नयामेचराशेचरविनेस्तःसार्पेपोस्मेतथाईश्॥आहिर्बुध्न्यचवारुणे॥मूलेचज्ञस्यहेवत्येयेभवंत्यद्भुतास्त
था॥वारुणेतेषुकर्तव्यामहाशांतिमहीसिताः॥मित्रमइत्यवेलासुयेभवंत्यद्भुताःक्वचित्॥तत्रशांति
रुयंकार्यनिमित्तेसतिनान्यथा॥एताःशांतयःआथर्वणेप्रसिद्धाः॥अथविशेषशांतयः॥तत्रेवतावि॰
रेहमाद्रे॥गर्गः॥हेवतार्चाःप्रस्खलतिवेयतेप्रस्खलतिवा॥आरटतिचरोहतिप्रस्विद्यतिहसतिच॥
न्निरुतिनिषीहतिप्रधावतिवमतिच॥नतेतिविक्रुताश्चेष्टामानुषाणांभयावहाः॥आचाद्युषावा
तिहतिस्थानाच्चानेभवतिच॥चमंत्यग्नितथाधूमस्नेहरक्तेतथावसा॥एवमादिनिरूपतेवकारा॰म
हाभयाः॥लिंगायतनचित्रेषुतत्रवासंनरोचयेत्॥राज्ञोवाचसनेतत्रसचरेद्गोविनश्यति॥
हेवयात्रासुचोत्पातान्दृष्ट्वादेवालयंवेहत॥हेवतार्चाविकारेषुस्तुतेषुचपुरोहितः॥हेवतायोनुगा॰

त्वावेस्नातामाछादयन्पयेत्॥पूजयेन्महाभागगंधमाल्यान्नसंपदा॥मधुपर्केणविधिवदुपतिष्ठेदनंतरं॥
तच्छिरोनवमंत्रेणस्थालीपाकंयथाविधिः॥पुरोधानुज्ञयाद्यैश्चोमसराज्ञमंतरितं॥विप्रांश्चपूज्यामधुरान्न
पानैःमहर्षिणैःससहितनरेंद्रःप्रासेहमेद्भिःक्षितिगोप्रदानैःसकांचनैःशांतिमुपैतिपापं॥अथाग्नि
विकारे॥तत्रैवगर्गः॥अग्निःप्रदीप्यतेयत्रराष्ट्रेभयमनिधनं॥नदीप्यतेधनवास्तद्राष्ट्रंपीड्यतेनृपैः
॥प्रासादतोरणाद्वारन्यवेश्मसुरायां॥एतानियत्रदृश्यंतेतत्रराज्ञेभयंवेहत॥विद्युतावाप्रदृश्यंतेतत्रापि
नृपतेर्भयं॥अनेशांतितमासिस्युर्विनाधूमरजोसिच॥अथदृश्योत्पातशांतिः॥गर्गः॥धूमश्चानग्निजोयत्रतत्रविघा
न्महाभयं॥तद्विद्यान्नगरेनेभयंस्माद्दृष्टिवर्जिता॥दिवासनारेगगनेतथैवनयमाद्दिशेत्॥ग्रहनक्षत्रवैकृते
तारविच्छुतिदर्शने॥पुत्रवाहनदारेषुचक्षुष्यगृहेषुच॥स्वभावाद्वापिहीयेतधनुवस्माद्विकंचयत॥लो
हायुधविकारःस्यान्नत्रसंग्राममादिशेत्॥चिरात्रोषितस्तत्रपुरोधाःसुसमाहितः॥समिद्भिःक्षीरवृक्षा
णांसर्षपैश्चघृतेनच॥होमंकुर्योदनिमंत्रैर्ब्राह्मणांश्चैवभोजयेत्॥हेमासुवर्णंचतथाद्विजेभ्यो गा॰

श्चैव वस्त्राणि तथा भुवं च॥ एवं कृते तत्समुपैति नाशं यदग्निवैकृत्यभवं द्विजेंद्र॥ अथ वृक्षोत्पातशांतिः॥ ग
र्गः॥ पुरेषु येषु दृश्यंते पादपा दैवचोदिताः॥ रुदंतो वा हसंतो वा चमंतो वा रसान्भुवि॥ अरोगो वा सरोगो
वा नित्यमेव विचारयेत्॥ अरोगा वा विना वातं शाखां मुंचति पादपा॥ फलं पुष्पं तथा काले दर्शयंती च पादपा
॥ पूर्वावस्थां दर्शयंति फलं पुष्पमनार्तवे॥ क्षीरस्नेहं सुरां रक्तं मधुतोयं स्रवंति वा॥ शुष्यंत्यरोगाः सहसा शुष्का रोहंति
वा पुनः॥ उत्तिष्ठंतीह पतिताः पतंति च तथोत्थिताः॥ तत्र प्रवक्ष्यामि ते ब्रह्मन्विपाके फलमेव च॥ रोदने व्याधिरत्येति हस
ने देशविभ्रमः॥ शाखाप्रयतने कुर्यात्संग्रामं योधपाततं॥ बालानां मरणं कुर्याद्बालानां फलपुष्पतः स्वराष्ट्रभेदं कु
रुते फलपुष्पमनार्तवं॥ क्षीरं सर्वत्र गंभीरं॥ स्नेहं दुर्भिक्षलक्षणं॥ वाहनाय वयं मद्यं रक्तसंग्राममादिशेत्॥ म
धुस्रवि भवेद्व्याधिजलस्रावेन वर्षति॥ अरोगशोणं ज्ञेयं ब्रह्मन्दुर्भिक्षलक्षणं॥ शुष्केषु संप्ररोहस्तु वीर्या
मन्नं च हीयते॥ उत्थाने पतितानां च भयं भेदकरं भवेत्॥ स्थानात्स्थानेषु गमने देशभंगं तथादिशेत्॥ ज
ल्पत्स्वपि च वृक्षेषु स्वनस्वपि धनक्षयं॥ एतत्पूजितवृक्षेषु वृक्षोत्पाते ष्टतंडितः॥ आच्छादयित्वा

तं वृक्षं गंधमाल्यैर्विभूषयेत्॥ वृक्षोपरि तथा छत्रं कुर्यात्पापप्रशांतये॥ शिवमत्यर्चयेद्देवं पशुं चा
स्मै निवेदयेत्॥ मूलेभ्य इति वृक्षेषु हुत्वा रुद्रं जपेत्ततः॥ माध्वाज्ययुक्तेन तु पायसेन संपूज्य विप्रांश्च भुवं
च दद्यात्॥ गीतेन नृत्येन तथार्चयेन देवं हरः पापविनाशहेतोः॥ इति वृक्षोत्पाते शांतिः॥ अद्भुतसागरे औशन
से॥ अश्वत्थे पुष्पिते विप्रं ब्राह्मणास्तदुदुंबरे॥ प्लक्षे वैश्यास्तु पीड्यंते न्यग्रोधे देवस्तथा कदंबे इक्षुर्वंशो फु
ल्लितश्चेत्कथंचन॥ वसंते पुष्पिते यत्र माणजं वृद्धवस्तथा॥ शृंगवेरोथवा यत्र मासैः षड्भिर्जनक्षयः॥ कुसुमात्कुसु
मोत्पत्तिः परचक्रामं वदेत्॥ उदुंबराणां समिधो जुहुयादयुतं ततः॥ महाव्याहृतिभिर्विप्रभोजयेद्वै सदक्षिणां॥ कदली
गर्भमूर्धन्यः प्ररोहति गृहे यदि॥ अरण्यं संभवेद्देशो गर्गस्य वचनं यथा॥ सहिरण्यं वृषं दद्याद्द्विजायोदुंबरी
समित्॥ इमा रुद्रेति मंत्रेण होतव्या च सहस्रधा॥ अथ दृष्टिवैकृतिशांतिः॥ गर्गः॥ अतिवृष्टिरनावृष्टि
दुर्भिक्षायो भयं मतं॥ अनृतौ तु दिवानंतावृष्टिव्याधिभयाय तु॥ अनभ्रवैकृताश्चैव विज्ञेया राजमृत्यवे
॥ अनच वैकृता मेघमंतरेण जातगर्जितादयः॥ शातोष्णानां विपर्यासे ऋतूनां रिपुजं भयं॥ शोणि

ते वर्षयेयत्रशस्त्रभयंभवेत्॥शृंगारणंसुवर्षेपुनर्गरंतद्विनश्यति॥मज्जास्थिस्नेहमांसानोज्ञनानोभ
यंभवेत्॥फलंपुष्पंतथाधान्यंपरेणातिभयायनु॥यांसुजेतृपलानांचवर्णेरोगज्ञभयं॥छिद्रावा
न्प्रवर्षेणसस्यानामीतिवर्धनं॥विरज्ञस्करौव्यत्वेयराछायानदृश्यते॥दृश्यतेचुप्रतीयावन्नचदृश्यभय
भवेत्॥प्रतीपाप्रतिकूलाछायाविपरिछायेत्यर्थ॥निरभ्रेवातथारात्रौव्यंतेयाम्योत्तरेणचु॥इंद्रायुधंतथा
ह्याउल्कापातस्तथैवच॥दिग्दाहपरिवेषौचगंधर्वनगरंतथा॥परचक्रभयंविद्याद्दृश्योपद्रवमेवच॥सूर्येउ
र्जनंयसमारणानायागस्त्यकार्योविधिर्वदेन्नृ॥धान्यानिगोकांचनरश्मिणाश्चैस्यादिज्ञानामघनाशहेतो॥
अथज्ञस्त्रायवेरुत्तशांति॥गर्ग॥नगारयसंयंतेसमीपउपयांतिच॥नद्योहरंप्रस्रवणानिरस्त्रावेभवंति
च॥विवर्णकलुषंतत्यंकेनावर्त्तेनुसकुल॥क्षीरस्नेहसुरारक्तंवहंतेमाकुलोदकं॥षण्मासास्मंतरंतत्र
रश्चक्रभयंविदुः॥ज्ञस्त्रायानदंतेचप्रज्वलंतिकथंचन॥विमुंचंतितथाज्ञ्वालाधूमरजांसिच॥
आखानेवाजलोत्पत्तिःसमत्वायाज्ञलाशयाः॥संगीतंत्रादृश्यंतेज्ञनमारभयंविदुः॥दिवंमह

मयंविद्धिमात्रवसेधने॥ज्ञसंख्यावारुणंमंत्रास्तोस्यहोमोज्ञलंभवेत्॥मधून्ययुक्तंपरमान्नेर्यद्वि
ज्ञानामघमोज्ञनार्थं॥गावश्चरेयुःसितवस्त्रयुक्तास्तथोरुकुंभाःसकलाघशांत्यै॥अथोपस्कारवेरुत
शांति॥गर्ग॥यांतियामान्ययुक्तानियुक्तामपिनयांतिचेत्॥चोद्यमानामितत्रस्थान्महद्भयमुपस्थितं॥वाद्यमा
नवाद्यतेवाघतेवाप्यनाहतः॥अचालाश्चचलंत्येवनचलाश्चचलंतिच॥शब्दंगेयंनृत्यंनास्त्रगीतंगंधर्वनिस्वन
॥काष्ठरविकुमाहिकारंकुरुतेयदि॥गवस्थूलंसंघाश्चस्त्रियःस्त्रीवापिघातयेत्॥उपस्कारादिविकृतोघोरंस्यात्त
भयंभवेत्॥वायोर्यपूजांहिज्ञसंकुमिश्चरुतानियुक्ताश्चज्ञपेत्पंचमंत्रान्॥इद्यान्प्रभूतपरमान्नमत्रसरर्षिरंतेनशमोस्य
भूपात॥अथमृगपक्षिवेरुतशांति॥गर्गमुनिरुवाचयोसेरयामासरणेमृगपक्षिणः॥अरण्यंयांतिवाग्रामास्तस्यं
तिनेतोद्भवा॥ग्रामास्तस्यंयांतिज्ञलोद्भवाः॥स्थलजाजांगलावाज्ञलयांतिघोरावाशांतिर्भवेत्॥राजद्वारेपुरद्वारेग्रि
हाश्चाप्यशिवप्रदाः॥दिवारात्रिंचरावापिरात्रौवापिदिवाचराः॥ग्रामास्तज्जेतियामंवाशून्यतोतस्यनि
र्दिशेत्॥दीप्तंवामंतिमंतिसंध्यासुप्रदीप्तानिचकुर्वते॥वाशंतेविस्वरंयत्रतत्राप्येतत्फलंभवेत

॥प्रदोषे कुर्कुटो वासेद्वेमंते चायिकोकिलः॥ अर्कोदये कौनिमुखी शिवा वापि भयं दिशेत्॥ गृहे कपोतः प्रविशेत्क्रव्या
दो मूर्ध्नि लीयते॥ मधुवा मक्षिका कुर्यान्मृत्युर्गेहपतेर्भवेत्॥ क्रव्यादो गृध्रकाकादिः॥ प्राकारद्वारगेहेषु तोरणाय वा
यिषु॥ केतुछत्रायुधाद्येषु क्रव्यादः संश्रयेद्यदि॥ जायते चाथ वल्मीको मधुवा दृश्यते यदि॥ सदेशो नाशमायाति रा
जा वा म्रियते तदा॥ सूपिकाः शलभा नुदृष्ट्वा प्रभुतः क्षुद्भयं वदेत्॥ काष्ठोल्मुकास्थिगंगास्याश्वानेमके वेदना॥ दुर्भिक्ष
वेदिनो ज्ञेयाः काकाधाममुपो यदि॥ जनानभिभवंतश्च निर्भयारण्यवेदनाः॥ काको मैथुनयुक्तश्चेत्श्वेतः स यदि द
श्यते॥ राजा वा म्रियते तत्र सदेशो वा विनश्यति॥ उलूको वासते यत्र नियते द्वा तथा गृहे॥ क्षयो गृहपतेर्मृत्युर्धननाशस्त
थैव च॥ वासते कुशब्दं करोति॥ मृगपक्षिविकारेषु कुर्यार्द्धामं सदक्षिणं॥ देवाः कपोत इति च जप्तव्यं यं च भिर्द्विजैः॥ वसु
देव इति चैके देया गावश्च दक्षिणाः॥ जपेच्छकुंतसूक्तं च सनो वेदशिरांसि च॥ गावश्च देया विधिद्विजानां सकांचनावस्त्र
युगोत्तरीयाः॥ एवं कृते शांतिमुपैति पापं मृगैर्द्विजैर्वा विनिवेदितं यत्॥ इति मृगपक्षिवैकृतशांतिः॥ अद्भुतसारे नार
दः॥ मध्याह्ने चार्धरात्रे च उदये स्तेमये थवा॥ ग्राममध्ये यदा विप्रफेत्कारं कुरुते शिवा॥ ग्रामोत्सादो भवेत्तत्र रा

शो मरणमादिशेत्॥ जुहुयात्पंचसाहस्रं जातवेदसमंत्रवित्॥ धेनुं च दक्षिणां दद्यात्सुवर्णं धान्यमेव च राशो
मरणमावच॥ अस्मिन्नाशुकृते शांतिः शुभं ग्रामस्य वै भवेत्॥ अथाकमस्मिकप्रसादपतनादिशांतिः गर्गः॥ प्रसादतो
रणादालं द्वारप्राकारवेश्मन्॥ अनिमित्तं तु पतनं दृढानां राजमृत्यवे॥ रजसा वाथ धूमेन दिशो यत्र समाकुलाः॥
आदित्यचंद्रताराश्च विवर्णा भयवृद्धया॥ रक्षसा यत्र दृश्यंते ब्राह्मणाश्च विधर्मिणः॥ ऋतवश्च विपर्यस्ता अपूज्यं पूज
येज्जनः॥ नक्षत्राणि वियोगीनि तन्महद्भयलक्षणं॥ केतूदयोपरागौ च छिद्रं वा शशिसूर्ययोः॥ ग्रहर्क्षो विकृतिर्यत्र तत्रापि भय
मादिशेत्॥ स्त्रियश्च कलहायंते बालानि घ्नंति बालकान्॥ क्रियाणामुच्चितानां च चिछितिर्यत्र दृश्यते॥ अग्निर्यत्र न दृश्येत हू
यमानोथ शाम्यति॥ क्रव्यादवायसा वाहा यांति चोत्तरस्तथा॥ पूर्णकुंभाः स्रवंते च वह्निर्वा विप्रलुप्यते॥ मंगल्यध्वनयो य
त्र श्रूयंते च समंततः॥ क्षवथुर्बाधते वाथ प्रोत्साहे सति तर्दितः॥ न देवंते षु वर्त्तंते यथावद्ब्राह्मणेषु च॥ मंदघोषानिवा
द्यानि वाद्यंते विस्वराणि च॥ गुरुमित्रद्विषो यत्र शत्रुपूजारता जनाः॥ ब्राह्मणान्सुहृदो मान्या जनो यत्रावमन्य
ते॥ शांतिमंगलहोमेषु नास्तिकं यत्र मन्यते॥ राजा वै म्रियते तत्र तस्य देशो विनश्यते॥ राज्ञो विनाशे संप्राप्ते निमित्ता

भनिनिबोधमे॥ब्राह्मणान्पथमंहेष्टब्राह्मणांश्चैवनिर्हति॥ब्राह्मणास्वानिवाहत्वेब्राह्मणाश्चजियोसति
॥नतास्मरतिरूपेषुपावितश्चामसूयति॥रमतेनिर्दयाचैवप्रशंसानाभिनिर्हति॥अपूर्वेशुक्रंलोमान्नखापा
नयतेनने॥एतेघम्यचयस्वम्कूसपत्निकानद्विजोत्तमान्॥भोज्यानिचैवकार्याणिमुराणांवत्सयस्तथा॥गावश्च
ह्यादिजपुंगवेभोभुवतथाकांचनमंबराणि॥होमश्चकार्योद्विजपूजनंरवंक्षतेशांतिमुपैतिपापं॥मृत्यूरचि
वे॥यशकृत्कवटायतेनवनाम्नायुधानिच॥मासाभ्यंतरमात्रेणनरासंयममाप्नुयात्॥हिंस्याच्चैकाहशांशांतिक
रणीयाविपश्चिता॥अथनोनोत्पाताःशांतिः॥गर्गः॥श्रोत्यानिकंमहाशांतिनत्वनःश्रृणुमेधुना॥यत्रव्याधिरनाद्दृष्टि
रपरचक्रमुपस्थितं॥दुर्भिक्षंजननमारोवाराजोमरणमेवचा॥तत्रशांतिक्रमःप्रोक्तोमहाकतुमिहारभेत्॥पुनरोमश्चकर्त्ते
योहस्मतिर्मतंयथा॥गावस्तथैवसत्यास्तथैवायुर्विवर्धिनी॥राजोभिषेककुर्वीततथैवचमहाक्रतुं॥द्विजाश्चसमराज्ञे
दाउपोष्यचपुरोहितः॥श्रोदुंबरीणांविधिवत्समिधांचशतंहुत॥सावित्राकारयेत्कर्मततःपापप्रशाम्यति॥अथुस्मर्मति
र्गीतेचअतिपर्वमन्दुंके॥अनार्तवंपुष्पफलमतिमात्रेचमारुतः॥भैरवेचातिमात्रेचरुदंति॥

